एवं बहुविधं तस्य पुण्यं सिद्धेश्वरस्य च ।
सिद्धेश्वरे नरः स्नात्वा सिद्धिं प्राप्नोत्यसंशयम् ॥ ११ ॥
नानाविधानि तीर्थानि तत्र सन्ति द्विजोत्तमाः ।
नानाविधास्तथा देवा नानासिद्धगणास्तथा ॥ १२ ॥
यो व्रजेद् विरजःक्षेत्रे मधुमासे नरोत्तमः ।
आश्विने माधवे वापि तस्य सिद्धिर्भवेद् ध्रुवम् ॥ १३ ॥
दोलस्य स्थानं क्रोडं च तत्र पश्यन्ति ये नराः ।
ब्रह्महत्यादिपापानि क्षयित्वा मुक्तिमाययुः ॥ १४ ॥
भौमवारे चतुर्दश्यां वारे वाथ बृहस्पतेः ।
यः पश्येद् विरजं भक्त्या मनुष्यो भक्तिमाप्नुयात् ॥ १५ ॥
तत्र श्रीविरजाग्रे च यः पठेन् मन्त्रमुत्तमम् ।
स मन्त्रः सिद्धिदः तस्य सत्यं सत्यं द्विजोत्तमाः ॥ १६ ॥
तत्पृष्ठभागे यो नित्यं पूजयेत् सिन्धुजापतिम् ।
स्थण्डिले प्रतिमायां वा शालग्रामेऽथवा शुभे ॥ १७ ॥
गन्धैः पुष्पैश्च नैवेद्यै धूपैर्दीपैः स्तवैस्तथा ।
मालाभिर्वाऽपि ताम्बूलैः पूजयेच्च जनार्दनम् ॥ १८ ॥
षण्मासाभ्यन्तरे देवो ददाति वरमीप्सितम् ।
प्राप्य सिद्धिं मृते चैव गच्छेद् विष्णुमनामयम् ॥ १९ ॥
एवं चास्य गुणाः सन्ति विरजाख्यस्य निर्मलाः ।
वक्तुं शक्नोति को देही विना शेषेण सत्तमाः ॥ २० ॥
सहस्रयोजनान्ते च यो जपेद् विरजां शुभः ।
तस्येप्सितमसौ देवी ददाति किल तत्परा ॥ २१ ॥
विरजाख्यं द्विजश्रेष्ठा एवं निगदितं मया ।
तत्र यूयं तपस्तप्त्वा परां सिद्धिं गमिष्यथ ॥ २२ ॥

इति श्रीकपिलपुराणे गिरिजामाहात्म्यं नाम,
अष्टमोऽध्यायः ॥ ८ ॥
उवाच संख्या २, अर्द्धश्लोक संख्या × पूर्णश्लोकसंख्या २२

अथ नवमोऽध्यायः

ऋषय ऊचुः

पुरा त्वया निगदिताः कृष्णार्कपार्वतीहराः ।
अधुना श्रोतुकामाश्च वयं शम्भो वदस्व नः ॥ १ ॥
तत् कीर्तितं त्वया विप्र ! मुक्तिदं पुरुषोत्तमम् ।
मैत्रेयं विरजाख्यं च सर्वपापनिसूदनम् ॥ २ ॥
नीलाद्रिस्तु जलाकीर्णो विरजाख्यस्ततोऽधिकः ।
मैत्रेयं बालुकाकीर्णं दुःसहं रवितेजसा ॥ ३ ॥
तस्मात् पवित्रं परमं किञ्चिन्नास्ति तपोधनाः ।
अस्माकं तपसे क्षेत्रं तस्मिन्नद्रौ वद प्रभो ! ॥ ४ ॥
तत्र विश्वेश्वरश्चास्ते इति प्रोक्तं त्वया पुरा ।
तस्य स्थानं वदास्माकं तदेव तपसः फलम् ॥ ५ ॥

भरद्वाज उवाच

वक्ष्यामि परमं पुण्यं स्थानं शम्भोर्द्विजोत्तमाः ।
सर्वपापहरं रम्यं कैलाशं पर्वतोत्तमम् ॥ ६ ॥
विरजैकाम्रयो र्मध्ये कैलाशं च श्रुतं द्विजाः ।
सर्वपापहरो देवस्तत्र श्रीशिखरेश्वरः ॥ ७ ॥
वकुलैश्चम्पकैर्वृक्षैः सपुष्पैरुपशोभितम् ।
सपल्लवैश्चूतपूगैर्नारिकेलैः सवामरैः ॥ ८ ॥
खर्जूरैरर्जुनैश्चैव पनसैः सुमनोहरैः ।
कर्कन्धूकुलकैर्वृक्षैर्दाडिमैः प्रियदर्शनैः ॥ ९ ॥

विल्वै र्लोध्रैः पलाशैश्च पुन्नागैस्तुङ्गकेशरैः ।
जम्बुदन्तशटैर्वृक्षैः कोविदारैः फलार्दितैः ॥ १० ॥
तिन्तिडीवटवृक्षैश्च खदिरैश्चम्पकैस्तथा ।
पारिभद्रैश्च वकुलै र्धात्रीभिर्नागकेशरैः ॥ ११ ॥
जातिकाजूथिकाभिश्च पुष्पैश्चैव सुवासितैः ।
तगरैर्मल्लिकाभिश्च करवीरैः सपाटलैः ॥ १२ ॥
अशोकै र्मालतीभिश्च माधवीभिः कदम्बकैः ।
सेवन्तिकाभिः कुन्दैश्च काञ्चनैः श्वेतरक्तकैः ॥ १३ ॥
एवं नानाविधैर्वृक्षैः पुष्पै र्नानाविधै र्नरैः ।
विश्वनाथस्य तत् स्थानं पूरितं वै समन्ततः ॥ १४ ॥
शिखरेशं समासाद्य सम्वत्सरमतन्द्रितः ।
मन्त्रेणाश्रयते यस्तु तस्य मन्त्रः प्रसिध्यति ॥ १५ ॥
तत्रासौ विश्वनाथस्तु विश्वस्योत्पादने रतः ।
मोक्षदः कामदः श्रीमान् लिङ्गरूपी न संशयः ॥ १६ ॥
पुण्यक्षेत्राणि सन्त्यज्य पुण्यस्थानान्यनेकशः ।
कैलाशे पार्वतीनाथः एकाकी च परन्तपः ॥ १७ ॥
यदोद्धृतश्च कैलाशो रावणेन दुरात्मना ।
तदेकशृङ्गं पतितं तत् कैलाशमिहोच्यते ॥ १८ ॥
कैलाशादधिकं मन्ये कर्मभूमौ यतः स्थितम् ।
तत्र कर्मफलं भोगस्तत्र भोगाश्च केवलम् ॥ १९ ॥
कैलाशे शङ्करस्थाने ये वसन्ति नरोत्तमाः ।
इह भोगफलावाप्ति र्मुक्तिस्तेषां करे स्थिता ॥ २० ॥

कैलाशनिलयं शम्भो दुर्लभं मुक्तिदायकम् ।
यत्र देवगणाः सन्ति नित्यं शम्भोः समीपतः ॥ २१ ॥
आलोक्य शिखरेशं च पूजयित्वा प्रणम्य च ।
सुरभीमारणं दोषं क्षिप्त्वाऽर्घ्यं च व्रजेन्नरः ॥ २२ ॥
गुरुपत्नीकृतं दोषं गुरुनिन्दां कृतां तथा ।
व्रजेत् क्षिप्रं क्षयहेतुं स्मरन् वै शिखरेश्वरम् ॥ २३ ॥
ब्रह्मादिदेवताः सर्वाः काङ्क्षन्ति च मुहुर्मुहुः ।
भूमिलोकं कदा गत्वा द्रक्ष्यामः शिखरेश्वरम् ॥ २४ ॥
काङ्क्षन्ति पितरश्चैव प्रजाश्च सुनृपं यथा ।
यदास्माकं कुले जातः कैलाशाद्रिं गमिष्यति ॥ २५ ॥
तत्र गत्वा प्रयत्नेन स्नाति तीर्थे पयोऽमृते ।
अस्माकं तर्पयित्वा च नरकादुद्धरिष्यति ॥ २६ ॥
तस्मिन्नद्रौ द्विजश्रेष्ठास्तीर्थमस्ति पयोऽमृतम् ।
अग्रे श्रीशिखरेशस्य ईशानदिशमास्थितम् । २७ ॥
वरेण्यं परमं पुण्यं पितॄणां मुक्तिदायकम् ।
यत्र स्नात्वा च सौदासो राजा मुक्तिमवाप ह ॥ २८ ॥

ऋषय ऊचुः

तत्तीर्थस्य च माहात्म्यं विस्तरेण वदस्व नः ।
अन्यतीर्थस्य माहात्म्यं तस्मिन्नद्रौ द्विजोतमाः ॥ २९ ॥

भारद्वाज उवाच

भोगवत्यां च भूर्लोके स्वर्लोके सचराचरे ।
पयोऽमृतसमं तीर्थं नास्ति नास्ति वदाम्यहम् ॥ ३० ॥

पुरा सत्ये च सौदासो रविवंशे महीपतिः ।
बभूव नरशार्दूलः प्रजापालनतत्परः ॥ ३१ ॥
वक्ता श्रोता महाशान्तो बृहस्पतिरिवापरः ।
रूपेण रतिनाथस्तु संग्रामे शचिनायकः ॥ ३२ ॥
तस्य बुद्धिः समुत्पन्ना मन्त्रं साधयितुं पुरा ।
वशिष्टं परिपप्रच्छ नृपतिः स्वपुरः स्थितम् ॥ ३३ ॥

सौदास उवाच

मन्त्रसिद्धि र्भवेत् कुत्र तत्स्थानं वद सत्तम !
यत्र स्नात्वा च जप्त्वा च गमिष्यामि परं पदम् ॥ ३४ ॥
आस्ते वाराणसी क्षेत्रं मुक्तिदं सिद्धिकामदम् ।
यत्र विश्वेश्वरो देवः साधकानां वरप्रदः ॥ ३५ ॥
वाराणसीसमं भूप ! क्षेत्रं नास्ति महीतले ।
लिङ्गरूपधरः साक्षाद् यत्र देवो जगत्पतिः ॥ ३६ ॥
तस्मिन् क्षेत्रे महीपाल ! तीर्थं श्रीमणिकर्णिका ।
स्नात्वा तत्र नरो नारी ब्रह्महत्यात् प्रमुच्यते ॥ ३७ ॥
यत्र भागीरथी पुण्या नराणां मुक्तिदायिनी ।
भूलोके चैव पाताले स्वर्गलोके प्रतिष्ठिता ॥ ३८ ॥
भागीरथ्याश्च माहात्म्यं विस्तरं गदितं पुरा ।
यदम्बु कणमात्रं च ब्रह्महत्यां क्षयं नयेत् ॥ ३९ ॥
वाराणसी विश्वनाथो जाह्नवी मणिकर्णिका ।
एकैका दुर्लभा राजन् ! किमु यत्र चतुष्टयम् ॥ ४० ॥

भरद्वाज उवाच

इति तस्य वचः श्रुत्वा महर्षेश्च नराधिपः ।
तमृषिं प्रणिपत्याशु प्रतस्थे क्षेत्रमुत्तमम् ॥ ४१ ॥

गत्वा स्नात्वा च गङ्गायां दृष्ट्वा च पार्वतीपतिम् ।
क्षमा-सत्य-समायुक्तस्तपस्तेपे सुदारुणम् ॥ ४२ ॥
एवं च कतिचित् काले गते देवो महेश्वरः ।
स्वरूपं दर्शयित्वा तं स्वप्ने वाक्यमुवाच ह ॥ ४३ ॥

शङ्कर उवाच

आगतस्ते महाबाहो ! क्षेत्रं मुक्तिप्रदं मम ।
इदानीं गच्छ तपसे कैलाशनिलयं मम ॥ ४४ ॥
तत्राहं दर्शयिष्यामि सत्यं त्वां मामकीं तनुम् ।
मुक्तिं चैव प्रदास्यामि सत्यं सत्यं मयोदितम् ॥ ४५ ॥
मत्पार्श्वे चैव हातेन्द्रतीर्थं नाम पयोऽमृतम् ।
चतुर्वर्गप्रदश्चैव तत्राहं शिखरेश्वरः ॥ ४६ ॥
सर्वपापहरं लिङ्गं नाम्ना श्रीशिखरेश्वरम् ।
यो मां पश्यति तत्रस्थं तस्मै मुक्तिं ददाम्यहम् ॥ ४७ ॥
तत्र तत्तपसा तुष्टो युगे सत्ये महीपते !
त्रेतायां द्वापरे चैव दर्शनात् सिद्धिदः स्वयम् ॥ ४८ ॥
कलौ च दर्शनेनैव सिद्धिदोऽहं नृणां किल ।
तस्मिन्नद्रौ तीर्थवरे यः स्नाति च पयोऽमृते ॥ ४९ ॥
स याति परमं स्थानं मद्देहे च प्रलीयते ।
पयोऽमृते महातीर्थे पयस्तेनामृतोपमम् ॥ ५० ॥
अमृतत्वं प्रयच्छाशु कृते स्नाने तवाम्भसि ।
अनेन विधिना भूप ! तत्र स्नानं समाचर ॥ ५१ ॥
तत्र स्नात्वा च मां दृष्ट्वा परां सिद्धिं गमिष्यसि ।
तत्रैव तीर्थं प्रवरं मदग्रे पापनाशनम् ॥ ५२ ॥

जंभकुनुमिति ख्यातं किंचदग्रे यमस्थितम् ।
पतन्ति तत्र वारीणि सर्वाङ्गशुभदानि च ॥
सर्वलोकपवित्राणि सर्वलोकशुभानि च ॥ ५३ ॥
पर्वतोद्भवशीतानि तत्र स्नात्वा सुखं लभेत् ।
जलेषु च शिरो दत्वा शुद्धो भूत्वा नरोत्तमः ॥ ५४ ॥
तत्र स्नानेन यत् पुण्यं शृणुष्व रविवंशज !
कैलाशकुण्डे सुस्नातः पूजयित्वा महेश्वरम् ॥ ५५ ॥
नरः सिद्धिमवाप्नोति तत्प्रसादान्न संशयः ।
तत्तोये मम तीर्थे च पूजनीयः स्थितो ह्यहम् ॥ ५६ ॥
तत्र गत्वा मन्त्रजपाल् लभते मुक्तिरूपताम् ।
इत्युक्त्वा गतवान् देवो राजा निद्रोत्थितस्तदा ॥ ५७ ॥
एकाकी च गतः श्रीमान् कैलाशाचलमुत्तमम् ।
तत्र राजा तपस्तप्त्वा स्नात्वा तीर्थे पयोऽमृते ॥ ५८ ॥
कञ्चित्कालं स्थितश्चासौ पश्चान् मुक्तिं जगाम ह।
एकाकी देवदेवेशस्तत्र कैलाशपर्वते ॥ ५९ ॥
तत्र कोलाहलं कृत्वा नरके पच्यते ध्रुवम् ।
एवं मया निगदितं तत्स्थानं पर्वतोत्तमम् ॥
तत्र गत्वा तपस्तप्त्वा परां सिद्धिं गमिष्यथः ॥ ६० ॥

इति श्रीकपिलपुराणे सौदासमुक्तिप्राप्तिर्नाम
नवमोऽध्यायः ॥ ९ ॥

उवाचसंख्या ७, अर्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या ६०

★

अथ दशमोऽध्यायः

ऋषय ऊचुः

तत्र कोलाहलं कृत्वा नरो नरकमाविशेत् ।
वयं तत्र गमिष्यामो भरद्वाज ! कथं वद ॥ १ ॥
सम्यक् स्थानं त्वया प्रोक्तं कैलाशं पार्वतीपतेः ।
तपस्तप्तुं महत् स्थानं केवलं दोषवर्जितम् ॥ २ ॥
उत्कले क्षेत्रमपरं किञ्चदस्ति तपोधन !
तद् वदाशु द्विजश्रेष्ठ ! अस्माकं च हितेच्छया ॥ ३ ॥
त्वत्प्रसादाद् भविष्यामः कृतार्था मुनिसत्तम !
गुह्यं किमपरं ह्यस्ति क्षिप्रं वद महामते ॥ ४ ॥

भरद्वाज उवाच

एकाग्रमनसो भूत्वा शृणुध्वं मुनिसत्तमाः ।
आख्यातं कस्यचित् पूर्वं गोपनीयं प्रयत्नतः ॥ ५ ॥
गुह्याद् गुह्यतमं ज्ञेयं परात् परतरं स्मृतम् ।
एकाग्रकरणं नाम तस्मिन्नद्रौ तपोधनाः ॥ ६ ॥
प्राणिनां मुक्तिदं शस्तं देवानां जयवर्द्धनम् ।
निर्मलं च निराकारं क्षेत्रं हरिहरात्मकम् ॥ ७ ॥
नरसिद्धगणाकीर्णं मुनीन्द्रैरुपशोभितम् ।
गन्धर्वैः किन्नरैर्जुष्टं विद्याधरसचारणैः ॥ ८ ॥

आम्र-निम्ब-कदम्बैश्च सपुष्पैश्च फलान्वितैः ।
पूगैः पनसकै वृंक्षै र्न्यग्रोधै र्वकुलैस्तथा ॥ ९ ॥
पलाशै र्मुचुकुन्दैश्च पारिजातैः प्रियाङ्गुभिः ।
कर्कन्धु-नग-नारङ्गै वृंक्षै रजादनैरपि ॥ १० ॥
खदिरै श्चैव विल्वैश्च वञ्चुभिः करहाटकैः ।
कर्णिकारै र्जपापुष्पैः कपित्थैः चिपुमन्दकैः ॥ ११ ॥
चम्पकैरतिमुक्तैश्च सुपुष्पै र्नागकेशरैः ।
शालतालशिरीषैश्च जम्बीरैः प्रियदर्शनैः ॥ १२ ॥
कदलीवन-षण्डैश्च पूरितं सुमनोहरैः ।
कर्वीरैः कर्णिकारैश्च कपित्थैर्बहुलैर्वरैः ॥ १३ ॥

यूथिकामल्लिकाभिश्च जातीलकुचकैस्तथा ।
अशोकैर्वकुलैश्चैव द्विरेफगणशोभितैः ॥ १४ ॥
मालतीलतिकाभिश्च दाडिमैर्बीजपूरकैः ।
एवं नानाविधैर्वृंक्षैः तद् वनं पूरितं द्विजाः ॥ १५ ॥
दशादनैः खञ्जविटैः कोकिलैः कलनिःस्वनैः ।
चटकैश्चातकैश्चैव चकोरैश्चित्रपक्षिभिः ॥ १६ ॥
व्याघ्राटैः कुक्कुटैश्चैव शिरोमुकुटभूषितैः ।
पारावतैः सूक्ष्मपक्षैः लोहपृष्ठै र्वरानने ॥ १७ ॥
कादम्बै राजहंसैश्च प्रियायुक्तैः शुकैस्तथा ।
वर्तिकैस्तित्तिरीभिश्च मयूरैर्घननृत्यकैः ॥ १८ ॥
सिंहै र्व्याघ्रैश्च खड्गैश्च भूदारैर्ऋक्षगैर्मृगैः ।
एवं नाना विधैरन्यैश्चतुष्पादै र्विहङ्गमैः ॥ १९ ॥

पूरितं तद् वनं पुण्यं स्वजातिपरिनिष्ठितः ।
दीर्घिकाभिस्तडागैश्च पद्मोत्पलविराजितैः ॥ २० ॥
कारण्डवैः प्लवैर्हंसैस्तवकै र्जलकुक्कुटैः ।
अकर्दमैः स्वच्छतोयैः सोपानेन विराजितैः ॥ २१ ॥
एवं नानाविधगुणैः समन्तात् परिपूरितम् ।
एकाग्रं परमं पुण्यं वनं विष्णुप्रियं महत् ॥ २२ ॥
सुवासितै र्गन्धवत्या उर्मिभिर्मुरुचश्चलैः ।
वामविक्षेपितैः पुण्यैः शीतलं सुमनोहरम् ॥ २३ ॥
साक्षाद् वैकुण्ठभुवनं जानीध्वं मुनिसत्तमाः ।
एकाग्रे तु जगन्नाथो भाति पाषाणलीलया ॥ २४ ॥
शङ्खचक्रधरः श्रीमान् वनमालाविभूषितः ।
यत्र विश्वेश्वरः शम्भुः साक्षान्नारायणात्मकः ॥ २५ ॥
यस्माद् यूयं मुक्तिकामास्तस्माद् वै तत्र गच्छत । २६ ॥

इति श्रीकपिलपुराणे एकाम्रवर्णनं नाम
दशमोऽध्यायः ॥ १० ॥

उवाचसंख्या २ अर्द्धश्लोकसंख्या १ पूर्णश्लोकसंख्या २६

अथैकादशोऽध्यायः

ऋषय ऊचुः

विस्तरेण समाख्याहि क्षेत्रमेकाम्रकं मुने !
आश्रमाणि च रम्याणि तत्र लिङ्गानि कोटिशः ॥ १ ॥
श्रोतुकामा वयं सर्वे गमिष्यामो न संशयः ।
पूजयामो विरूपाक्षं नीरदाभं जनार्दनम् ॥ २ ॥

भरद्वाज उवाच

क्षेत्रमेकाम्रकं श्रीमत् परमानन्ददायकम् ।
समन्तात् क्रोशमात्रं च कोटिलिङ्गावृता मही ॥ ३ ॥
तत्रासौ देवदेवस्तु स्वगणैः पार्वतीपतिः ।
वरदो मुक्तिदो नृणां साधकानां च सिद्धिदः ॥ ४ ॥
परमानन्दरूपेण संस्थितः परमेश्वरः ।
परात् परतरो ज्ञेयो ब्रह्मादीनां वरप्रदः ॥ ५ ॥
वाराणसीं परित्यज्य जलाकीर्णो महेश्वरः ।
प्रार्थयित्वा हरेः पुण्यमेकाम्रे वनमाविशेत् ॥ ६ ॥

ऋषय ऊचुः

प्रार्थितं च कदाऽनेन शम्भुना लिङ्गरूपिणा ।
सर्वमेतत्तु वृतान्तं विस्तरेण वद प्रभो ॥ ७ ॥

भरद्वाज उवाच

पुरा त्रेतायुगे विप्रा वाराणस्यां महेश्वरः ।
तिष्ठन् वाक्यमुवाचेदं नारदं मुनिपुङ्गवम् ॥ ८ ॥

शिव उवाच

अस्यां पूर्यामधिष्ठाय नरस्याघो विनश्यति ।
जातेयं च जनाकीर्णा तपोविघ्नकरी मुने ॥ ९ ॥
यत् स्थानं च जनाकीर्णं तत्र स्थातुं न युज्यते ।
उपद्रवो भवेत्तत्र नास्तिकैं ज्ञानदुर्बलैः ॥ १० ॥
नास्तिका यत्र तिष्ठन्ति तत्र धर्मो न विद्यते ।
अधर्माच्च भवेल्लुप्तो हरेर्भागो मुनीश्वराः ॥ ११ ॥
एतत् स्थानं प्रयत्नेन पार्वत्यर्थं पुरा कृतम् ।
पार्वत्या रुचिरं यत्र तत् स्थानं मम हर्षदम् ॥ १२ ॥
अधुनात्र मुनिश्रेष्ठ ! स्थातुं नोत्सहते मनः ।
रहस्यं परमं स्थानं कुत्रास्ति मां वदाशु च ॥ १३ ॥

नारद उवाच

लवणस्योदधेस्तीरे नीलशैलो नगोत्तमः ।
तदुत्तरस्यां विख्यातं क्षेत्रमेकाम्रकं प्रभो ॥ १४ ॥
तत्र श्रीवासुदेवस्तु रमानाथो जगद्गुरुः ।
अनन्तेन सह श्रीमान् एकाकी विजने वने ॥ १५ ॥
तत् स्थानं परमं गुह्यं न जानाति प्रजापतिः ।
भगवानपि जानाति देवतानां च का कथा ॥ १६ ॥
एकाम्रं परमं गुह्यं जगन्नाथस्य चक्रिणः ।
क्रोडस्थिताऽब्धिकन्यापि नैव जानाति शङ्करः ॥ १७ ॥

साक्षाद् विग्रहवान् तत्र अनन्तेन जनार्दनः ।
सृष्टयुत्पत्तिनाशौ च स्थितिस्तेन विचार्यते ॥ १८ ॥
सर्वदा सोप्यनन्तस्तु देवेन सह तिष्ठति ।
लक्ष्मणो रामचन्द्रश्च कृष्णो वै रोहिणीसुतः ॥ १९ ॥
दिवसानेकपर्य्यन्तं तपस्तप्त्वा महेश्वरः ।
प्रसन्नो वासुदेवश्च ज्ञातं तैः क्षेत्रमुत्तमम् ॥ २० ॥
अहं शेषो जगन्नाथस्त्रयाणां तत्र सङ्गतिः ।
इन्द्रादीनां च देवनामन्येषां च न विद्यते ॥ २१ ॥
एवं परमपुण्यं तन् मया ज्ञातं पुरा प्रभो !
इदानीं भवता ज्ञातं क्षेत्रं परमपावनम् ॥ २२ ॥

भरद्वाज उवाच

एवं निगदिते तस्मिन्नारदे चण्डिकापतिः ।
मुनिपाणौ करं दत्त्वा गन्तुं चक्रे मनस्तदा ॥ २३ ॥
गणाध्यक्षमुवाचेदं वचनं नन्दिकेश्वरम् ।
एकाम्रकं गमिष्यामि सज्जो भवतु पुत्रक ॥ २४ ॥
गृहीत्वा तरसा गच्छ वृषेन्द्रं गिरिजां शुभाम् ।
नाथाज्ञां शिरसा धृत्वा शूलपाणिर्ययौ तदा ॥ २५ ॥
समानीय च वृषभं पार्वती निर्जगाम ह ।
कोटिलिङ्गाद् यथासंख्यं कथयामास सत्वरम् ॥ २६ ॥
सज्जीभवध्वं यूयं च गतैकाम्रं जगद्गुरुः ।
इत्युक्त्वा गतवाँस्तत्र गृहीत्वा गिरिजां वृषम् ॥ २७ ॥
स्वयं वेशधरो भूत्वा देवदेवः समारुहत् ।
कोटिचन्द्रप्रतीकाशं नानाभूषणभूषितम् ॥ २८ ॥

दृष्ट्वा स्ववाहनं शम्भु नंन्दिनं प्रसशंस ह ।
ततोऽसौ नन्दिकेशस्तु देवदेवस्य कर्णयोः ॥ २९ ॥
कुण्डलं सज्जयामास नाना रत्नविराजितम् ।
कोटिसूर्य्यप्रतीकाशं हेमवैदूर्य्यनिर्मलम् ॥ ३० ॥
मूर्ध्नि देशे सुमुकुटम् अर्द्धचन्द्रविभूषितम् ।
कर्पूरमिश्रितं शुद्धं चन्दनं च सुवासितम् ॥ ३१ ॥
शीतलं पार्वतीशस्य भालपट्टे च लेपितम् ।
ततो गण्डस्थले चैव कुङ्कुमं मृगपत्रिकाम् ॥ ३२ ॥
ताम्बूलमधरे शुद्धं ददौ नन्दी ससत्वरः ।
हृदये चोज्ज्वलं हारं माणिक्यं मौक्तिकं तथा ॥ ३३ ॥
गलेन रञ्जयामास चन्दनं पुष्पमालिकाम् ।
पद्मरागयुतौ हेमौ कङ्कणौ सुप्रकाशितौ ॥ ३४ ॥
ददौ श्रीकरयोस्तस्य विद्युदाभाश्च चन्द्रिकाः ।
तत्र पट्टाम्बरं कट्यां नीवीवस्त्रं ततोपरि ॥ ३५ ॥
मेखलां स्वञ्जयामास क्षुद्रघण्टां सुशोभिताम् ।
पादयो नूंपुरं दिव्यं नीलेन्द्रमणिसंयुतम् ॥ ३६ ॥
सुवेशमेवं देवस्य नन्दिकेशश्चकार ह ।
सुवेशः सुमुखः श्रीमान् कोटिचन्द्रद्युतिर्हरः ॥ ३७ ॥
लसति सवृषो देवो क्रोडे कृत्वा हिमाद्रिजाम् ।
इत्थं भूत्वा जगामाशु गीयमानः पुरःसरैः ॥ ३८ ॥
चामरैर्व्यजनैः शुभ्रैः सिद्धगन्धर्वकिन्नरैः ।
श्वेतातपत्रं शिरसि कोट्यर्कद्युतिनिन्दकम् ॥ ३९ ॥

दीर्घनादं सुविस्तीर्णं रम्यं भृकुटिनर्तनम् ।
जयशब्दं तथा नृत्यं कुर्वन्त्यप्सरसां गणाः ॥ ४० ॥
त्रिशूलं डमरूं चैव व्याघ्राम्बरसमन्वितः ।
एवं श्रीपार्वतीनाथो भक्तानां वरदायकः ॥ ४१ ॥
एकाम्रं प्रापयामास नारदेन महात्मना ।
गत्वैकाम्रे दमेनासौ वासुदेवं सनातनम् ।
साष्टाङ्गेन प्रणम्याशु स्तुतिमेतां चकार ह ॥ ४२ ॥

श्रीशङ्कर उवाच

नमस्ते परमानन्द नमो नीलाम्बलोचन !
नमस्ते हरये तुभ्यं त्रयीमूर्तिधराय च ॥ ४३ ॥
नीलजीभूतवपुषे नमस्ते लोकनायक !
देवानां वरदाताऽसि प्रसन्नार्तिहर प्रभो ॥ ४४ ॥
एकाम्रकनिवासाय नमस्ते पीतवाससे ।
त्रिगुणै र्वाह्यरूपाय शङ्खचक्रावधारिणे ॥ ४५ ॥
त्वमेक जगतामादिः कारणानां च कारणम् ।
भक्तबन्धो ! जगन्नाथ ! करुणामयसागर ॥ ४६ ॥
तव स्थानानि रम्याणि सन्ति देव ! सहस्रशः ।
एकाम्रे गुप्तरूपं च न जानामि कथं प्रभो ॥ ४७ ॥
मामुवाच पुरा विष्णो ! त्वं ममार्द्धशरीरकः ।
इदानीं तु कथं राज्यं कृतवानसि केशव ॥ ४८ ॥
नारदस्तव भक्तस्तु शय्या ते भुजगेश्वरः ।
केवलं तौ हि जानीतः कृपा नास्ति मयि प्रभो ॥ ४९ ॥

गोपीनां प्रेमभक्तानां दत्ता भक्तिस्त्वया प्रभो !
सनकाद्याश्च तिष्ठन्ति ईश्वरेच्छा निरङ्कुशाः ॥ ५० ॥
एकाम्रविपिने रम्ये तिष्ठन्ति परमेश्वर !
योगनिद्रां समाश्रित्य लोचनार्द्धौ च मुद्रितौ ॥ ५१ ॥
इदानीं करुणां कृत्वा देहि मे जगदीश्वर !
स्वस्थानं देहि मे स्थातुमागतोऽहं तवान्तिके ॥ ५२ ॥
स्तुतिरित्थं प्रकुर्वाणे हिमाद्रितनयापतौ ।
उन्मील्य लोचने विष्णु विहसन् वाक्यमब्रवीत् ॥ ५३ ॥

श्रीवासुदेव उवाच

शृणु मद्वचनं शम्भो ! कथयामि हितं तव ।
स्थातुं स्थानं प्रदास्यामि कुरु सत्यं ममाग्रतः ॥ ५४ ॥
नैव काशीनिवासाय स्थास्याम्यत्र च सर्वदा ।
स्वगणैरावृतो नित्यम् इति सत्यं महेश्वर ॥ ५५ ॥

श्रीशङ्कर उवाच

काशीं कथं न यास्यामि तत्रास्ते जाह्नवी मम ।
सर्वतीर्थमयी पुण्या तीर्थं मे मणिकर्णिका ॥ ५६ ॥

वासुदेव उवाच

नारदस्तु न जानाति नैव शेषो गिरीश्वर !
अहमेव विजानामि विद्धि त्वमधुना हर ॥ ५७ ॥
अत्रैव जाह्नवीत्यस्ति मत्पादाग्रच्युता शुभा ।
आग्नेय्यां दिशि पृष्ठे मे गङ्गा च मुनिसंज्ञका ॥ ५८ ॥
अन्यत्रान्यत्र तीर्थानि सुगुप्तानि च सन्ति मे ।
पश्चात् सर्वाणि वक्ष्यामि कुरु सत्यं च शङ्कर ! ॥ ५९ ॥

शङ्कर उवाच

सत्यं सत्यं वदाम्यत्र तिष्ठामि मधुसूदन !
वाराणसीं परित्यज्य अन्यक्षेत्राणि माधव ६० ॥
एकाम्रविपिने स्थास्ये तव सन्निहिते प्रभो !
सत्यं सत्यं पुनः सत्यं न यास्यामि च कुत्रचित् ॥ ६१ ॥
इत्युक्त्वा भगवान् शम्भुस्तद्विष्णोर्दक्षिणे दिशि ।
दिग्रूपधरश्चास्ते चतुर्वर्गफलप्रदः ॥ ६२ ॥
मूले स्फटिकसङ्काशं महानीलं च मध्यमम् ।
माणिक्यादिसममग्र्यं लिङ्गं त्रिभुवनेश्वरम् ॥ ६३ ॥

भारद्वाज उवाच

ततः प्रभृति भो विप्राः क्षेत्रे राजा महेश्वरः ।
कोटिलिङ्गावृतः श्रीमान् वासुदेवस्तु पालकः ॥ ६४ ॥
तस्य पश्यन्ति ये लिङ्गमेकाम्रे मुनिसत्तमाः ।
ब्रह्म हत्यायुता वापि मुक्तिस्तेषां करे स्थिता ॥ ६५ ॥
एवं शम्भुः प्रार्थयित्वा वासुदेवं सनातनम् ।
एकाम्रविपिने ह्यास्ते कोटिलिङ्गधरः प्रभुः ॥ ६६ ॥

इति श्रीकपिलपुराणे एकाम्रे महेशागमनं नाम
एकादशोऽध्यायः ॥ ११ ॥

उवाचसंख्या १३ अर्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या ६६

●

अथ द्वादशोऽध्यायः

ऋषयः ऊचुः

तस्मिन् तीर्थे द्विजश्रेष्ठ ! वद तीर्थं फलप्रदम् ।
नामधेयं तथोत्पन्नं सुगुप्तं चक्रपाणिना ॥ १ ॥

भरद्वाज उवाच

गते च कतिचित् काले तत्र देवो महेश्वरः ।
रममाणः स्थितस्तत्र दृश्यमेकमजायत ॥ २ ॥

तस्मिन् क्षणे च भो विप्राः श्रवन्ति जलविन्दवः ।
तस्माद् विन्दुसरो नाम चक्रे देवगणैः सह ॥ ३ ॥

पुष्करादीनि तीर्थानि क्षीरोदादींश्च सागरान् ।
गङ्गाद्याः सरितश्चैव सर्वान् देवान् समर्चयेत् ॥ ४ ॥

सर्वे तत्र स्रवन्तिस्म जलविन्दूनहर्निशम् ।
तस्माद् वेदे पुराणे च नाम्ना विन्दुसरोवरः ॥ ५ ॥

गङ्गा गोदावरी रेवा तुङ्गभद्रा च नर्मदा ।
कालिन्दी सरयू श्चैव तापी तत्र स्रवन्ति च ॥ ६ ॥

मानसं पुष्करं पम्पा सुतीक्ष्णं शैलनिर्मलम् ।
स्रवन्त्येतानि सर्वाणि तीर्थे विन्दूद्भवे द्विजाः ॥ ७ ॥

क्षीरोधिर्लवणोधिश्च पयोधि दुग्ध एव च ।
सन्ति विन्दूद्भवे तीर्थे दधि-सर्पि:-सुरार्णवाः ॥ ८ ॥
द्वारावत्यां च तत्तीर्थं नैमिषे दण्डके वने ।
तानि विन्दूद्भवे नित्यं तथा वदरिकाश्रमे ॥ ९ ॥
एकाम्रकवने विप्रास्तीर्थं बिन्दुसरः श्रुतम् ।
तत्र स्नात्वा च पीत्वा च न नरो नरकं व्रजेत् ॥ १० ॥
तीर्थं विन्दूद्भवं विप्रा मुनीन्द्रैरुपसेवितम् ।
पवित्रं निर्मलजलं सोपानैरुपशोभितम् ॥ ११ ॥
स्वर्गे मर्त्ये च पाताले ह्यन्तरिक्षे तथा दिशि ।
न भूतं न भविष्यं च तीर्थं विन्दूद्भवात् परम् ॥ १२ ॥
विन्दूद्भवं जलं विप्रा अमृतं नात्र संशयः ।
विन्दूद्भवे नरः स्नात्वा यः पश्येद् वृषभध्वजम् ॥ १३ ॥
सर्वपापविनिर्मुक्तः शिवदेहे प्रलीयते ।
अत्र चैव द्विजश्रेष्ठा देवी पावहरा श्रुता ॥ १४ ॥
तां दृष्ट्वा पूजयित्वा च नरस्तु सुखमेधते ।
पादे देव्या हरो यस्मात् तस्मात्पादहरा स्मृता ॥ १५ ॥
तत्र स्नात्वा च तां दृष्ट्वा पश्चात् पश्येन्महेश्वरम् ।
याऽसौ पादहरा देवी नराणां सुखदायिनी ॥ १६ ॥
द्वितीये विग्रहे श्रेयः दात्री सर्वस्य विद्यते ।
स्नात्वा विन्दूद्भवे तीर्थे दृष्ट्वा पादहरां शुभाम् ॥ १७ ॥
तस्मात्तीर्थेश्वरं पूज्य नरो मुच्येत् पातकात् ।
विन्दुतीर्थे नरः स्नात्वा दृष्ट्वा श्रीपुरुषोत्तमम् ॥ १८ ॥

देवीं पादहरां दृष्ट्वा ह्यक्षयंच फलं लभेत् ।
यस्तु पश्यति तल्लिङ्गं नाम्ना त्रिभुवनेश्वरम् ॥ १९ ॥
देवदेवो जगत्स्वामी तस्मै मुक्तिं प्रयच्छति ।
तस्मिन् तीर्थवरे स्नात्वा दृष्ट्वा श्रीधरशङ्करम् ॥ २० ॥
कामगेन विमानेन वैष्णवं पदमाप्नुयात् ।
श्रेष्ठं च सर्वतीर्थानां विन्दूद्भवमुदाहृतम् ॥ २१ ॥
एतन्निगदितं विप्राः ! तीर्थं विन्दूद्भवं शुभम् ।
अपरं कथयिष्यामि किं विप्रा वदत शुभम् ॥ २२ ॥
पुण्याख्यानमिदं येन पठ्यते श्रूयतेऽथवा ।
सर्वपापक्षयं कृत्वा सोऽमृतत्वमवाप्नुयात् ॥ २३ ॥

इति श्रीकपिलपुराणे विन्दूद्भवो नाम
द्वादशोऽध्यायः ॥ १२ ॥

उवाचसंख्या २ अर्द्धश्लोकसंख्या १ पूर्णश्लोकसंख्या २३

★

अथ त्रयोदशोऽध्यायः

ऋषय ऊचुः

विस्तरेण समाख्याहि क्षेत्रमाहात्म्यमुत्तमम् ।
वासुदेवस्य माहात्म्यं कोटिलिङ्गेश्वरस्य तु ॥ १ ॥

भरद्वाज उवाच

एकाम्रकं वनं श्रीमत् क्षेत्राणामुत्तमं वरम् ।
एकाम्रसदृशं क्षेत्रं भूमौ नास्ति द्विजोत्तमाः ॥ २ ॥
तदेव परमं स्थानं तदेव परमं पदम् ।
निर्भया निवसन्त्यत्र सर्वे देवाः सवासवाः ॥ ३ ॥
सर्वतीर्थमयं ह्येतद् एकाम्रवनसंज्ञितम् ।
तीर्थे साक्षात् परं ब्रह्म लिङ्गरूपी वसत्यसौ ॥ ४ ॥
एकाम्रकं महापुण्यं सर्वक्षेत्राधिकं फलम् ।
कामदं मोक्षदं चैव सर्वपुण्यविवर्धनम् ॥ ५ ॥
ये नरास्तत्र गच्छन्ति कृतसंकल्पमानसाः ।
पापं निर्दहन्त्याशु उद्धरेयुः कुलानि वै ॥ ६ ॥
एकाम्रसदृशं क्षेत्रं नैव पश्यामि किंचन ।
पापिनो यत्र गत्वा च लभेयु र्मोक्षमुत्तमम् ॥ ७ ॥
शरीरं विपिने तस्मिन् ये त्यजन्ति नरोत्तमाः ।
ते यान्ति शिवसान्निध्यं भासमानाः प्रियम्वदाः ॥ ८ ॥

हत्याकोटियुतो वापि गोघ्नो वा गुरुतल्पगः ।
एकाम्रविग्रहं दृष्ट्वा यान्ति विष्णुसनातनम् ॥ ९ ॥
हरिशङ्करयोर्मध्ये जले विन्दूद्भवे द्विजाः ।
कीटकोऽपि त्यजन् देहं नूनं याति परं पदम् ॥ १० ॥
अग्रे श्रीवासुदेवस्व शरीरं त्यजति तु यः ।
जलमध्यै द्विजश्रेष्ठा वासुदेवे च लीयते ॥ ११ ॥
तत्र त्यक्त्वा शरीरं स्वं कीटाद्या जङ्गमास्तथा ।
सर्वे मुक्तिपथं यान्ति मनुष्याणां च किं पुनः ॥ १२ ॥
एकाम्रके यदा जन्तुस्त्यजति स्वशरीरकम् ।
दाता श्रीभगवान् शंभुः कर्णमूले पठेदिदम् ॥ १३ ॥
त्वमत्र त्यजसि देहं पुरा पुण्यं कृतं त्वया ।
बदोङ्कारं व्रज परं वैष्णवं च सनातनम् ॥ १४ ॥
इति मन्त्रं समुच्चार्य्य कर्णमूले महेश्वरः ।
स्वगणान् प्रेषयित्वा च निराकरं नयेद् ध्रुवम ॥ १५ ॥
दक्षिणे गजराजस्य वृक्षश्चामलको द्विजाः ।
सर्वपापहरश्चासौ स्वयं देवेन निर्मितः ॥ १६ ॥
करोति नूनं नित्यं हि वासुदेवप्रियं शुभम् ।
विशेषोऽयं तरु विप्राः क्षेत्रराजस्थितो यतः ॥ १७ ॥
तन्मूले ये त्यजन्तिस्म शरीरं पापकृत्तमाः ।
ते मुक्ति च गता विप्राः किं पुनः पुण्यकर्मणाम् ॥ १८ ॥
अविश्वासकृतानां च एतां न परमेश्वरः ।
इममालकं वृत्तं विश्वासार्थं चकार ह ॥ १९ ॥

तत्रैकाम्रगृहे वाह्ये अन्तरिक्षे जले स्थले ।
यत्र तत्र शरीरं च त्यक्त्वा मुक्तिमवाप्नुयात् ॥ २० ॥
दुर्वृत्तः साधुवृत्तो वा यस्य वासो द्विजोत्तमाः ।
त्यक्त्वैकाम्रं स्वदेहं च नरो वैकुण्ठमालभेत् ॥ २१ ॥
एवं नानाविधगुणाः तस्यैकाम्रवनस्य च ।
यत्र साक्षाज्जगत्स्वामी दर्शनान्मुक्तिदो मतः ॥ २२ ॥
विघ्नेश्वरं वृषं देवं देवीं च श्रीगुहं तरुम् ।
सावित्रीं यः समालोक्य न मातुस्स्तनदो भवेत् ॥ २३ ॥
कोटिलिङ्गेश्वरं तत्र येऽर्चयन्ति समाहिताः ।
तेषां भाग्यवतां जन्म सफलं परिकीर्तितम् ॥ २४ ॥
गन्धैः पुष्पैस्तथा धूपैः दीपैः नैवेद्यकैरपि ।
मालाभिस्ताम्बुलैश्चैव एकाम्रविपिने शिवम् ॥ २५ ॥
पूजयन्ति नरश्रेष्ठा ये संतप्तमानसाः ।
तेषां गतिं द्विजश्रेष्ठाः शृणुध्वं कथयामि वः ॥ २६ ॥
नानाविधैः विमानैश्च सिद्ध-गन्धर्व-सेवितैः ।
पताकाभिर्ध्वजैः शुभैः अप्सरोगणनृत्यकैः ॥ २७ ॥
इन्द्रनीलप्रतीकाशैः पद्मरागनिभैस्तथा ।
निर्मितैः स्वर्णमुक्ताभ्यां शिवि शङ्करवेष्टितैः ॥ २८ ॥
व्रजन्ति शिवसान्निध्यं ते नराः दृष्टमानसाः ।
यथेप्सितानि भोगानि तत्र भुञ्जन्ति मानवाः ॥ २९ ॥
असौ देवो रूपाक्षो ब्रह्मरूपी न संशयः ।
अस्य दर्शनमात्रेण ब्रह्महत्या विनश्यति ॥ ३० ॥

एकाम्रविपिने नूनं लिङ्गरूपिनमव्ययम् ।
भक्त्या पश्यन्ति ये नित्यं तेषां मुक्तिः करे स्थिता ॥ ३१ ॥
नैवेद्यं यस्य देवस्य महापातकनाशनम् ।
ब्रह्मादीनां च देवानां भोग्यं ब्राह्मणसत्तमाः ॥ ३२ ॥
एकाम्रविपिने विप्राः लिङ्गं साक्षात् सनातनम् ।
नैवेद्यं यस्य वाञ्छन्ति शक्राद्यास्त्रिदिवौकसः ॥ ३३ ॥
अग्राह्यमीशनैवेद्यं न भोक्तव्यमिति द्विजाः ।
यानि वाक्यानि तान्यत्र नाद्रियन्ते कदाचन ॥ ३४ ॥
महाप्रसादं नैवेद्यमिति प्राहुर्महर्षयः ।
एकाम्रकानने विष्णो र्देहे ब्राह्मणसत्तमाः ॥ ३५ ॥
नैवेद्ये लिङ्गराजस्य पुण्ये संख्यां च मा कृथाः ।
तदनादृत्य नरकं यान्ति नास्यत्र संशयः ॥ ३६ ॥
तस्य श्रीलिङ्गराजस्य ध्वजारोपणमुत्तमम् ।
यः करोति नरः श्रेष्ठः स शिवत्वं च गच्छति
पट्टवस्त्रै र्नीलवस्त्रैः पीतशुक्लाम्बरैस्तथा ॥ ३७ ॥
ये कुर्वन्ति नरास्तत्र ध्वजारोपणमीश्वरे ।
ब्रह्महत्यादिपापानि क्षयित्वा ते नरोत्तमाः ॥ ३८ ॥
पितॄनुद्धृत्य नरकात् ते व्रजन्ति शिवं ध्रुवम् ।
पूजाकाले च यस्तत्र श्रावयन्ति मुरजध्वनिम् ॥ ३९ ॥
मृदङ्गशङ्खनादं च पटहं भेरिमेव च ।
काहलं रिणिभं शब्दं प्रत्नेन नरोत्तमाः ॥ ४० ॥
ते शब्दैर्वेष्टितास्ते च व्रजन्ति शिवमव्ययम् ।
श्रुत्वैवं तस्य शब्दं च नरो मुक्तिं व्रजेद्विजाः ॥ ४१ ॥

तस्य सन्निहिते पूर्वे एकाम्रेश्वरसंज्ञकम् ।
एकाम्रवृक्षस्तत्रासीत् पुरा कल्पे तु मुक्तिदः ॥ ५३ ॥
तत्र एको गतश्चाम्रस्तस्मादेकाम्रकं वनम् ।
महोच्छ्रायः सुशाखी च सुमनोहरपल्लवः ॥ ५४ ॥
धर्मार्थिकाममोक्षाश्च पत्र-वृक्ष-फलानि च ।
तं वृक्षं गोपनीयं च चकारासुरनाशनः ॥ ५५ ॥
तस्य मूलं शमेशस्तु तं नाम्नाऽऽख्यातिमागताः ।
तं दृष्ट्वा विधिमन्त्रेण धर्मकामार्थमाप्नुयात् ॥ ५६ ॥
तत्र श्रीशैलजाग्रे च तिक्तशाको महान् द्रुमः ।
पुरा श्रीभगवान् शम्भुः पादपं तमरोपयत् ॥ ५७ ॥
तस्य वृक्षस्य महात्म्यं शृणुध्वं पापनाशनम् ।
पुरा देवासुरे ज्येष्ठे भैरवेऽत्यन्तसंकटे ॥ ५८ ॥
इन्द्राद्या निर्जिताः सर्वे राक्षसैर्बलदर्पितैः ।
तदेन्द्रः शङ्कमानस्तु वाक्यमूचे बृहस्पतिम् ॥ ५९ ॥

बृहस्पतिरुवाच

गच्छैकाम्रं शचीनाथ ! पश्य देवं सनातनम् ।
तिक्तशाकतले तत्र तपस्तप्त्वा च जेष्यसि ॥ ६० ॥
श्रुत्वेत्थं वचनं तस्य दुष्टनाशपरस्तथा ।
किं तेजः परमं मन्त्रं बहुकालं जजाप ह ॥ ६१ ॥
ततः श्रीभगवान् भर्गस्तपसा परितोषितः ।
रम्यं सुश्लिष्टवचनमुचितं बलसूदनम् ॥ ६२ ॥

शङ्कर उवाच

पादपोऽयमहं साक्षात् शृणुध्वं पाकशासन !
तस्य मूले जपन् मन्त्रं ददामि वरमीप्सितम् ॥ ६३ ॥

तस्य पूजां समालोक्य न जाने किं फलं भवेत् ।
कोटिलिङ्गेश्वरस्याग्रे यस्तु भक्त्या जपेन् मनुम् ॥
इह लोके सुखी भोगी देहान्ते शिवमाप्नुयात् ॥ ४२ ॥
कोटिलिङ्गेश्वरो यस्तु तद् ब्रह्मैव न संशयः ।
यमालोक्य नरा नित्यं प्राप्नुवन्ति मनोरथम् ॥ ४३ ॥
ब्रह्मादिदेवताः सर्वा यमर्चयन्त्यहर्निशम् ।
भक्त्या बिन्दूद्भवे तीर्थे स्वपदं प्राप्नुवन्ति च ॥ ४४ ॥
नास्ति नास्ति समं लिङ्गं कोटिलिङ्गेश्वरात् परम् ।
भोगवत्यां भुवि स्वर्गे सत्यं सत्यं वदामि वः ॥ ४५ ॥
एकाम्रविपिने विप्राः योऽसौ त्रिभुवनेश्वरः ।
तस्य दर्शनमात्रेण नरो मोक्षं च गच्छति ॥ ४६ ॥
प्रदक्षिणं प्रकुर्वन्ति कोटिलिङ्गेश्वरस्य ये ।
पदात् पदाद् ब्रह्मपदं तेषां सन्निहितं भवेत् ॥ ४७ ॥
चण्डेश्वरं समासाद्य सव्यासव्यप्रदक्षिणम् ।
लङ्घनं सोमसूत्रस्य कृत्वा नरकमश्नुते ॥ ४८ ॥
तस्याग्रे वृषराजस्य स्वयं विग्रहवान् द्विजाः ।
तं दृष्ट्वा पूजयित्वा च शिवप्रीतिं लभेन्नरः ॥ ४९ ॥
देवस्य पृष्ठभागे तु नैर्ऋतिं दिशमाश्रिताम् ।
सावित्रीं पूजयित्वा च दृष्ट्वा वाञ्छितमाप्नुयात् ॥ ५० ॥
अग्रे विघ्नेश्वरं दृष्ट्वा पार्श्वे चण्डे हिमाद्रिजाम् ।
पूजयित्वा प्रयत्नेन नरकांश्च जिघांसति ॥ ५१ ॥
देवस्य उत्तरे भागे किञ्चिदुत्तरदिग्गतम् ।
शिखिध्वजं समालोक्य नरः सम्पदमालभेत् ॥ ५२ ॥

अधुना हूयतां दैत्यान् तस्मिन्नेकाम्रकानने ।
जेतासि कुरु सङ्ग्रामं तस्मिन्नेकाम्रकानने ॥ ६४ ॥

ततः त्रिदशनाथेन स्वीकृतं क्रतुनाशनम् ।
सङ्गतः त्रिदिवं सर्वदेवताभिः समन्वितः ॥ ६५ ॥

सह दैत्यैस्ततो युद्धं चकार वलसूदनः ।
आज्ञया देवदेवस्य जघान वरदानवान् ॥ ६६ ॥

ततोऽम्बरात् पुष्पवृष्टिः पुरुहूतस्य मस्तके ।
पपात देवताः सर्वा ययुः स्वं स्वं पुरं ततः ॥ ६७ ॥

एवं श्रीतिक्तशाकस्तु वृक्षः परमसिद्धिदः ।
स्वमन्त्रेण च तं दृष्ट्वा मनोरथमवाप्नुयात् ॥ ६८ ॥

एवं मया वो गदितं समासतो
वृक्षस्य माहात्म्यमतीव निर्मलम् ।
मूलेऽस्य कृत्वा परमं तपः पुरा
जघान दैत्यान् त्रिदशाधिपो द्विजाः ॥६९॥

इति श्रीकपिलपुराणे शक्रयोगवर्द्धनंनाम
त्रयोदशोऽध्या ॥ १३ ॥

उवाचसंख्या ७, सार्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या ६९

अथ चतुर्दशोऽध्यायः

भरद्वाज उवाच

अथ वक्ष्यामि माहात्म्यं वासुदेवस्य भो द्विजाः ।
वासुदेवस्य संकीर्त्या नरोमुक्तिमवाप्नुयात् ॥ १ ॥
तत्र एकाम्रके पुण्ये वासुदेवो जगद्गुरुः ।
वैकुण्ठं च परित्यज्य आस्ते विग्रहवान् स्वयम् ॥ २ ॥
नानारत्नैः सुघटितैः कङ्कणै र्भुजशोभितः ।
किङ्किणीभूषितकटि नँवपल्लवपादकः ॥ ३ ॥
जम्बुनीमकदम्बादि— निद्रा-घूर्णित-लोचनः ।
कुण्डलाभ्यां विचित्राभ्यां गण्डस्थलविराजितः ॥ ४ ॥
भ्राजमानो जटाभिश्च भृकुटै र्नाकितेजसा ।
इन्द्रनीलमणिश्यामः श्रीवत्साङ्कितविग्रहः ॥ ५ ॥
वाडिमीपुष्पसंकाशस्त्वधरोऽमृतदायकः ।
रामकृष्णस्वरूपेण स्थितोऽसौ कमलाधरः ॥ ६ ॥
साक्षाद् ब्रह्म स्वरूपोऽयं परं ब्रह्म उदाहृतः ।
अद्वितीयोऽक्षयो नित्यो वासुदेवेतिसंज्ञकः ॥ ७ ॥
स एव गतिदाता च स एव परमात्मकः ।
कीटवृक्षपतङ्गेषु स आस्ते हृदयस्थितः । ८ ॥

यो वा वन्ति ततं पुटं वासुदेवं निरञ्जनम् ।
भक्त्या तं नैव पश्यन्ति पच्यन्ते रौरवे चिरम् ॥ ९ ॥
सर्वक्षेत्राणि रम्याणि तीर्थान्यायतनानि च ।
परित्यज्य जगन्नाथ एकाम्र वनमास्थितम् ॥ १० ॥
एकाम्र प्रलये विप्रा न नाशमधिगच्छति ।
तस्मात् सर्वाणि संत्यज्य आस्ते तत्र गदाधरः ॥ ११ ॥

एकाम्रकं विन्दुसरोवरं ते,
परात्परं ब्रह्म सदात्मकोऽस्ति ।
अनीश्वरः शाश्वत ईश्वरस्तु,
श्यामोपसन्धो हरिरर्कतेजः ॥ १२ ॥

ब्रह्मस्वरूपो यमतत्त्व वस्तु,
भक्तप्रियः शान्तमलः सुदेहः ।
ज्ञात्वा मनोमानपरीक्षकाणां
सरः फलं यद्यतते यथोक्तम् ॥ १३ ॥

असौ मुरारिः जनतापहारी
रक्षार्थमेकस्तु विराजमानः ।
कौमोदकी शङ्खरथाङ्गधारी,
पीताम्बरः कौस्तुभमादधानः ॥ १४ ॥

ब्रह्मस्वरूपो यमकल्मषस्तु
भक्तप्रियः शान्तमलः सुदेहः ।
ज्ञात्वा मनोमानस राक्षसानां
सरः फलं यच्छति यद्यथोक्तम् ॥ १५ ॥

श्रीवासुदेवस्य च दर्शनेन
दत्तस्य शेषस्य गदायुधस्य ।
शठाः खला नास्तिककर्मयुक्ता
एकाम्रके मुक्तिमवाप्नुयुस्ते ॥ १६ ॥

योऽसौ सर्वगतो देवो मुरारिः मधुसूदनः ।
स आस्ते भगवान् साक्षाद् एकाम्रवनमध्यगः ॥ १७ ॥

पृथिव्यां यानि तीर्थानि ऋषीणामाश्रमाणि च ।
हरिस्तानि परित्यज्य शिलारूपधरः स्वयम् ॥ १८ ॥

नीलाद्रौ च दारुवपुः कदाचित् संत्यजेद् हरिः ।
एकाम्र न त्यजेद् भाति सदा पाषाणनीलया ॥ १९ ॥

एकाम्रवनमध्यास्ते शङ्खचक्रधरो हरिः ।
यस्य स्मरणमात्रेण पातकानि ययुः क्षयम् ॥ २० ॥

किं फलं तन्न जानामि तस्य देवस्य दर्शने ।
पुरुषोत्तमं मेवाथ भजन् संपूजयन् नरः ।
एकाम्रवने नूनं नरो मुक्तिमवाप्नुयात् ॥ २१ ॥

एकाम्रकं गमिष्यामि द्रक्ष्यामि पुरुषोत्तमम् ।
इत्युच्चरति यस्यास्ये सोऽपि बिष्णुपुरं व्रजेत् ॥ २२ ॥

तथा तीर्थानि सन्त्यज्य एकाम्र पुरूषोत्तमः ।
यद्धि वेदे पुराणे च प्रणवः जप्यते सदा ।
स एव प्रणवो नित्यं भाति पाषाणदेहभृत् ॥ २३ ॥

यदेष परमं ब्रह्म ब्रह्मलोके पितामहः ।
चतुर्वेदेषु शास्त्रेषु ब्रह्मैतत्तच्छिलाङ्गकम् ॥ २४ ॥

तत्र विन्दूद्भवे स्नात्वा यः पश्यन्मुखपङ्कजम् ।
जीवन्नेव कृतार्थस्तु स भवेन्नात्र संशयः ॥ २५ ॥
मुखपद्मं समालोक्य तस्य श्रीब्रह्मरूपिणः ।
सनकाद्याः शुकाद्याश्च परं निर्वाणमाययुः ॥ २६ ॥
कृष्ण कृष्णेति गायन्ति तस्याग्रे ये नरोत्तमाः ।
भावनादी भक्तबन्धुस्तेभ्यो मुक्तिं प्रयच्छति ॥ २७ ॥
यस्तु तच्चरणोद्भूतमुदकं पिवते नरः ।
बहिरन्तर्गतं पापं तस्य नश्यति नान्यथा ॥ २८ ॥
दण्डप्रणामं कुरूते यस्तं मत्यों जनार्दनम् ।
तस्य सत्यं भवेत् पुण्यम् अश्वमेधशतोद्भवम् ॥ २९ ॥
तस्य श्रीवासुदेवस्य लीलया च प्रदक्षिणे ।
पदात् पदाद् विनश्यन्ति ब्रह्म हत्या सहस्रशः ॥ ३० ॥
एकाम्रविपिने विप्रा देवदेवो जनार्दनः ।
तदेव परमं ब्रह्म परमानन्ददायकः ॥ ३१ ॥
एकाम्रे परमं ब्रह्म वासुदेवेति संज्ञकः ।
भक्ति पाषाण वपुषा मुक्तिदोऽसुरनाशनः ॥ ३२ ॥
तस्याग्रे जपेन्मन्त्रं तं ध्यायन् पुरुषोत्तमम् ।
स एव याति वैकुण्ठं नरो विष्णुपरायणः ॥ ३३ ॥
कृत्वा कार्य्यमकार्य्यं वा दृष्ट्वैव तं जनार्दनम् ।
नरो वैकुण्ठमाप्नोति नान्यथा मुनिसत्तमाः ॥ ३४ ॥
वासुदेवस्य वैकुण्ठं स्थानं जानीथ वै द्विजाः ।
सर्वदा तत्र यस्तिष्ठेज्जीवन्मुक्तो भवेत्तु सः ॥ ३५ ॥

एवं नानागुणाः सन्ति वासुदेवस्य चक्रिणः ।
यस्य स्मरणमात्रेण ब्रह्महत्यादि गच्छति ॥ ३६ ॥
शङ्खचक्राङ्कितभुजं विपिनैकाम्रसंस्थितम् ।
कञ्जाक्षं पीतवसनं नीरदाभं हरिं भज ॥ ३७ ॥
इति मन्त्रं जपेद् यस्तु भक्तियुक्तेन तेजसा ।
वासुदेवो द्विजाः सत्यं तस्य मुक्तिं प्रयच्छति ॥ ३८ ॥
सहस्रयोजान्ते च शङ्खचक्रेति यो मनुम् ।
भजते दुर्लभां मुक्तिं प्राप्य शङ्खधरो व्रजेत् ॥ ३९ ॥
मन्त्रस्यास्य द्विजश्रेष्ठा उपदेशो न विद्यते ।
प्राणिमात्रेण जाप्यं च मुक्तिदं हरिमाव्रजेत् ॥ ४० ॥
क्रूरे भक्तिविहीने च न दातव्यः परो मनुः ।
कर्तव्यं गोपनीयं च न वाच्यं च परे जने ॥ ४१ ॥
शङ्खचक्रमनुर्विप्रा मन्त्रराजःस्मृतोः बुधैः ।
गोपनीयः परो मन्त्रः गुह्यो वः कथितो मया ॥ ४२ ॥
तस्मिन् पुण्यवने विप्रा लिङ्गं ब्रह्मेश्वरं स्मृतम् ।
तस्य दर्शनमात्रेण ब्रह्मलोकमवाप्नुयात् ॥ ४३ ॥
भास्करेशं च मेघेशं गोकर्णेश्वरसंज्ञकम् ।
स्वर्णजालेश्वरं लिङ्गं स्वर्णकूटेश्वरं तथा ॥ ४४ ॥
एतान् दृष्ट्वा नमस्कृत्य पूजयित्वा प्रयत्नतः ।
सर्वं पापं परित्यज्य कैलाशनिलयं व्रजेत् ॥ ४५ ॥
आग्नये देवदेवस्य लिङ्गं सूक्ष्मेश्वरं द्विजाः ।
अर्चयित्वा तमालोक्य पापराशिं परित्यजेत् ॥ ४६ ॥

तत्रैवास्नातकेशस्तु मध्यमेश्वर एव च ।
एतयो र्दर्शने विप्रा काशीवासफलं लभेत् ॥ ४७ ॥
तत्रैव पिण्डं वितरन् पितृणां सूक्ष्मदक्षिणे ।
पितृनुद्धृत्य नरकाद् देवलोकं व्रजेन्नरः ॥ ४८ ॥
तत्र सूक्ष्मेश्वरस्थाने पिण्डदानं करोति यः ।
स करोत्यक्षयां तृप्तिं पितृणां शिरसा नमन् ॥ ४९ ॥
विशेषं कथयिष्यामि देशकालं यथा द्विजाः ।
आश्विने मास्यमावस्यां यतात्मा नियतः शुचिः ॥ ५० ॥
यः कुर्य्यात् पिण्डदानं च श्रीसूक्ष्मेश्वरदक्षिणे ।
पितरस्तस्य तुष्यन्ति कल्पकोटिशतान्तरे ॥ ५१ ॥
तस्य पश्चिमदिग्भागे कपिलेश्वरसंज्ञकः ।
सर्वकामप्रदो देवः पूजितः कपिलेन सः ॥ ५२ ॥
कपिलेशं शुभं लिङ्गं देवाभिष्टप्रदायकम् ।
प्राणिनामीप्सितानां च मनोरथफलप्रदम् ॥ ५३ ॥
तत्र श्रीकापिलं कुण्डं सर्वतीर्थफलप्रदम् ।
तस्मिन् स्नात्वा वनं दृष्ट्वा ह्यक्षयं फलमाप्नुयात् ॥ ५४ ॥
तत्र उग्रेश्वरं लिङ्गं कौवेरीदिशमास्थितम् ।
दशलक्षैकलक्षाणां लिङ्गानां प्रभुरेव सः ॥ ५५ ॥
तं दृट्वा प्रीतियुक्तेन लक्षैकादशमाप्नुयात् ।
तत्र नन्दीश्वरः साक्षाद् देवाग्रे भृकुटीस्तथा ॥ ५६ ॥
तौ दृष्ट्वा च नमस्कृत्य सुखमाप्नोति मानवः ।
यमेश्वरस्तु तत्रास्ते मारुतीदिशमास्थितः ॥ ५७ ॥

तं पश्यन्तं नरं विप्रा यमदण्डो न बाधते ।
तस्याग्रे परमं तीर्थं पापनाशनसंज्ञकम् ॥ ५८ ॥
पापानि विलयं यान्ति तज्जले स्नानमात्रतः ।
मार्गशीर्षे कृष्णपक्षे ह्यष्टम्यां च द्विजोत्तमाः ॥ ५९ ॥
तत्र स्नात्वा पितॄन् तर्प्य यः पश्येद् यम-वारूणौ ।
तस्य तुष्टो भवेच्छम्भुः कलिकाले विशेषतः ॥ ६० ॥
तत्राष्टतीर्थं विधिवद् यः करोति नरोत्तमः ।
शिवलोकं समासाद्य न त्यजेत् स कदाचन ॥ ६१ ॥
कुण्डस्य दक्षिणे भागे ईशानेश्वरसंज्ञकः ।
तमाश्रयित्वा विधिवत् पदमैन्द्रमवाप्नुयात् ॥ ६२ ॥
एकाम्रकाननं पुण्यं कोटिलिङ्गाभिपूरितम् ।
कोटितीर्थसमायुक्तं देवानां जयवर्द्धनम् ॥ ६३ ॥
अनेकानि च लिङ्गानि तत्र सन्ति द्विजोत्तमाः ।
संख्यां तां शिवलिङ्गानां वक्तुं शेषो न शक्नुयात् ॥ ६४ ॥
कः शक्नोति गुणान् वक्तुं क्षेत्रस्यैकाम्रकस्य च ।
आश्रमाणि च रम्याणि तत्र सन्ति महर्षयः ॥ ६५ ॥
किंचित्प्रोक्तं मया विप्रा भवतामिहमुत्तमम् ।
किमन्यच्छ्रद्धया श्रोतुमिच्छथ परमन्तपाः ॥ ६६ ॥

इति श्रीकपिलपुराणे एकाम्रके नानालिङ्गवर्णनं नाम,
चतुर्दशोऽध्यायः ॥ १४ ॥

उवाचसंख्या २ सार्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या ६६

●

अथ पञ्चदशोऽध्यायः

ऋषय ऊचुः

पुनः किमस्ति परममाश्रमं मुनिसत्तम् ।
ब्रूहि सर्वमशेषेण तस्मिन्नेकाम्रकानने ॥ १ ॥

भरद्वाज उवाच

तस्मिन् पुण्यवने विप्रा देवदेवस्य चोत्तरे ।
रामेश्वर इति ख्यातो रामचन्द्रेण पूजितः ॥ २ ॥
रामचन्द्राश्रमे तच्च स्थानं पुण्यप्रदं शुभम् ।
नानामुनिगणाकीर्णं ब्रह्मवासवबन्दितम् ॥ ३ ॥
बकुलैः पनसैराम्रैः पादपैरुपशोभितम् ।
खगानेकैः मृगानेकैः समन्तात् परिपूरितम् ॥ ४ ॥
तत्स्थानं रघुनाथस्य तपोवृद्धिकरं महत् ।
तत्रास्ते जानकीनाथो नित्यमर्चति तं शिवम् ॥ ५ ॥
तत्राध्वरसमुद्भूतं तस्य लिङ्गस्य पश्चिमे ।
अशोक-वार-विख्यातं तीर्थं पापप्रणाशनम् ॥ ६ ॥
अशोकावधिकं तीर्थं नास्त्यत्र पृथिवीतले ।
यत्र स्नात्वा नरो विप्रा शिवलोकं च गच्छति ॥ ७ ॥

यः स्नाति तत्र संरम्भाद् ध्यात्वा हृदि महेश्वरम् ।
शुक्लाष्टम्यां विशेषेण स पापेषु न लीयते ॥ ८ ॥
दिश्युत्तरस्यां विख्यातं ससोश्चमुनिसत्तमाः ।
सर्वपापहरं रम्यमाश्रमं चोत्तरेश्वरम् ॥ ९ ॥
अग्रे देव्या तथेशस्य जपन् वै संयतात्मवान् ।
त्रिपक्षसंयुतं रम्यं पूरितं मुनिसत्तमैः ॥ १० ॥
अशोकै र्नीपलोध्रैश्च वकुलै र्नागकेशरैः ।
मालती-माधवी-युक्तं श्रेष्ठपदपसंयुतम् ॥ ११ ॥
तथैवाम्रैरामलकैः सफलैरुपशोभितम् ।
करवीरैः कर्णिकारैः पाटलैः सहकारकैः ॥ १२ ॥
एवं नानाविधै र्वृक्षैः पूरितं सुमनोहरम् ।
तत्र सिद्धेश्वरं लिङ्गमास्ते मुक्तिप्रदायकम् ॥ १३ ॥
मध्ये पुष्करिणीरूपा यमोत्पलसुशोभिता ।
दिव्यतोया सदापुण्या शीतला चापकर्दमाः ॥ १४ ॥
सिद्धेश्वरं समाराध्य मुनयः परमन्तपाः ।
प्राप्ता चैवोत्तमा सिद्धि रिहलोके परत्र च ॥ १५ ॥
सिद्धेश्वरात् परो देवो न भूतो न भविष्यति ।
यं दृष्ट्वा मुच्यते पापान्नास्ति ब्रह्मघ्नता नरे ॥ १६ ॥
शिरसा नतदेहस्तु प्रणामं विदधाति यः ।
स एव भगवान् विष्णुः स एव भगवान् शिवः ॥ १७ ॥
चतुर्दशसु लोकेषु य सिद्धो भगवान् शिवः ।
शिव एकत्वमायाति तस्मात् सिद्धेश्वरःस्मृतः ॥ १८ ॥

तं दृष्ट्वा मुच्यते पापं स्पृष्ट्वा दीर्घायुराप्नुयात् ।
पूजया मुक्तिमाप्नोति सत्यं सत्यं मयोदितम् ॥ १९ ॥
अस्य दक्षिणपार्श्वेऽस्ति कुण्डं पापप्रणाशनम् ।
विख्यातं तस्य नाम्ना तु स्नात्वा तोयं सुनिर्मलम् ॥ २० ॥
तत्र स्नात्वा सकुल्लोकः नाकपृष्ठे च मोदते ।
तत्र सिद्धेश्वरस्याग्रे यो जपेन्मन्त्रमुत्तमम् ॥ २१ ॥
तन्मन्त्रं सिद्धिदं तस्य समासान्नात्र संशयः ।
तत्र मुक्तेश्वरं लिङ्गं मुक्तिदं पापानाशनम् ॥ २२ ॥
अभ्याशे तस्य लिङ्गस्य तं दृष्ट्वा मुच्यते नरः ।
एवं मया मुनिश्रेष्ठा गदितं क्षेत्रमुत्तमम् ॥ २३ ॥

कपिल उवाच

श्रुत्वेत्थं वचनं तस्य भरद्वाजस्य भो नृप !
सानन्दा मुनयः सर्वे पुनः पप्रच्छुरादरात् ॥ २४ ॥
कृतार्थाश्च वयं सर्वे सत्यं सत्यं न सश्यः ।
पुनः पृच्छा च नो जाता क्षेत्रस्यात्यन्तिको प्रिया ॥ २५ ॥
सिद्धेश्वरसमीपे तु यानि लिङ्गानि सन्ति वै ।
तानि नो वद विप्रेन्द्रा यद्यस्ति करुणा तव ॥ २६ ॥
शृणुध्वं मुनिशार्दूला लिङ्गं सिश्रेश्वरं शुभम् ।
पूर्वं तं पूजयामास विष्णौजास्तु शचीपतिः ॥ २७ ॥
श्रुत्वेत्थं वचनं तेषाम् ऋषीणां भावितात्मनाम् ।
उवाच वचनं रम्यं भरद्वाजो महामतिः ॥ २८ ॥

भरद्वाज उवाच

अग्रे सिद्धेश्वरस्याथ सर्वसिद्धिप्रदायिनः ।
पूर्वस्यां दिशि देवस्य देव इन्द्रेश्वरः स्मृतः ॥ २९ ॥
तत्र यज्ञं चकारेन्द्रः सर्वदेवैर्वृतो द्विजाः ।
चक्रुर्विघ्नं दितिसुताः कृते यज्ञे विडौजसि ॥ ३० ॥
चक्रेऽसौ दितिदायादैः महायुद्धं बलान्वितैः ।
ततः पराजितः शक्रः देवानां शरणं गतः ॥ ३१ ॥
उवाच शङ्करं वीक्ष्य त्राहि मां परमेश्वर !
दैत्यैश्च निर्जितोऽहं वै यज्ञकाले जयप्रदः ॥ ३२ ॥
ततः तद्वचनं श्रुत्वा महादेवोऽभ्यभाषत ।
त्वदर्थं हि शचीनाथ ! शमयिष्यामि दानवान् ॥ ३३ ॥
इत्युक्त्वा सोऽतिवेगेन उपस्थाय तु धूर्जटिः ।
जघान दानवान् सर्वान् विष्णुनामितवर्चसा ॥ ३४ ॥
दत्वा वरं मघोनेऽथ तत्रैवान्तरधीयत ।
ततो वृद्धश्रवा लिङ्गे पूजयामास शङ्करम् ॥ ३५ ॥
सम्पूज्य विधिवल् लिङ्गं धूपदीपमनोहरैः ।
चन्दनेन सुगन्धेन जगामाप्यामरवतीम् ॥ ३६ ॥
एवमिन्द्रेश्वरोत्पन्नं प्रख्यातं च पुरानघाः ।
इन्द्रेश्वरमाहात्म्याद् विलयं यान्ति कल्मषाः ॥ ३७ ॥
एतदिन्द्रेश्वरस्थानं सर्वपुण्यप्रदं मतम् ।
नानामुनिजनाकीर्णं सर्ववृक्षविराजितम् ॥ ३८ ॥
येऽर्चयन्ति तमीशानं भक्तास्तु नरसत्तमाः ।
प्रेत्य ते यान्ति परमं स्थानं यद्देवदुर्लभम् ॥ ३९ ॥

येऽर्चयन्ति तमीशानमपि दुर्बाङ्कुरैः नराः ।
ते यान्ति विमलं स्थानं भासमानाः सुतेजसः ॥ ४० ॥
इत्थमिन्द्रेश्वराख्यानं कथितं मुनिसत्तमाः ।
सर्वपापहरं पुण्यं परमं स्वस्त्ययनं महत् ॥ ४१ ॥
य इदं शृणुयादार्षं वाचकं च न पूजयेत् ।
चक्षुषी तस्य कर्णौ च बधिरीभवतो द्विजाः ॥ ४२ ॥
तस्मात् फलैश्च वस्त्रैश्च तं स्वर्णैश्च प्रपूजयेत् ।
एवमिन्द्रश्वरो नूनं स्वभक्तेषु प्रसीदति ॥ ४३ ॥

इति श्रीकपिलपुराणे इन्द्रेश्वराख्यानं नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

उक्तार्धसंख्या ४, सार्द्धश्लोकसंख्या × पूर्णश्लोकसंख्या ४३

अथ षोडशोऽध्यायः

भरद्वाज उवाच .

अथ वक्ष्ये महापुण्यं नमस्कृत्य महेश्वरम् ।
दक्षिणे सिद्धिनाथस्य केदारेश्वरसंज्ञकम् ॥ १ ॥
केदारेशस्थलीं प्राप्य नरो भक्तिपरायणाः ।
पूजयित्वा महेशानम् आप्नुयात् फलमीप्सितम् ॥ २ ॥
दक्षिणामूर्तिनामाऽसौ सर्वसिद्धिप्रदायकः ।
फलन्तु दर्शनेनास्य वाजपेयाश्वमेधयोः ॥ ३ ॥
लिङ्गस्य पश्चिमे चैव दक्षिणे चोत्तरे तथा ।
सदा सेवन्ति योऽन्तश्च पुनात्यखिलभूर्भुवम् ॥ ४ ॥
यो नरो वा शिरोऽभ्युक्ष्य नरः शिवपरायणः ।
दुरितं नाशयत्याशु केदारेशप्रसादतः ॥ ५ ॥
तस्यां स्थल्यां तु देव्यास्ते गौरीत्रैलोक्यसुन्दरी ।
विशेषतो युगप्रान्ते साधकानां वरप्रदा ॥ ६ ॥
त्रयाणां जगतां माता गौरीरूपेण संस्थिता ।
तस्यास्तु दर्शने राजन् ! लोकनाथः प्रसीदति ॥ ७ ॥
एनामासादयेद्देवीं मन्त्राणां फलरूपिणीम् ।
यामुपास्य पुरा राजा नहुषोऽभून्महीतले ॥ ८ ॥

सा तत्रैव पुरा चक्रे कुण्डं केदारसंज्ञकम् ।
विविक्तं निर्मलजलं सोपत्तिपदसंयुतम् ॥ ९ ॥

विन्दूद्भवे तनुत्यागात् श्रीसूक्ष्मे पिण्डदानतः ।
केदारे उदकं पीत्वा पुनर्जन्म न विद्यते ॥ १० ॥

नवम्यामसिते पक्षे मूर्ध्नि दत्वाऽमितं फलम् ।
स्नात्वा तस्मिन् ह्रदे विप्राः किम्वा न लभते नरः ॥ ११ ॥

तत्र श्रीदक्षिणामूर्तेरग्रे पीठो महान् स्मृतः ।
तव पीठेति विख्यातः साधकनां फलप्रदः ॥ १२ ॥

नक्तव्रतं समास्थाय संयतात्मा जितेन्द्रियः ।
जप्त्वा त्रयोदशाहेन मन्त्रसिद्धिमवाप्नुयात् ॥ १३ ॥

यस्य केदारके स्थाने मन्त्रसिद्धिर्न जायते ।
विंशतिजन्मना तस्य सिद्धिर्न स्यात् कथञ्चन ॥ १४ ॥

केदारस्थानमासाद्य किञ्चिज्जप्त्वा मुनीश्वराः ।
न नरो नरकं याति सत्यं सत्यं पुनः पुनः ॥ १५ ॥

स्नात्वा केदारके तीर्थे दृष्ट्वा गौरीं महेश्वरम् ।
सकृज्जप्त्वा भवंत्पीठे कृतकृत्यो भवेन्नरः ॥ १६ ॥

कथयामि पुरावृतं केदारे तत्र वै द्विजाः ।
श्रुत्वा पापं परित्यज्य पुण्यराशिं गमिष्यथ ॥ १७ ॥

दक्षसत्रे प्रवृत्ते च वासवाद्याश्च देवताः ।
हविर्भागं विभुञ्जन्ति दत्तं देवामहीश्वराः ॥ १८ ॥

तदा दाक्षायणी देवी ज्ञात्वा पत्युर्विगर्हितम् ।
विवेश स्वयं वह्नौ भर्तुर्भक्तिपरायणा ॥ १९ ॥

ततो महेश्वरो देवो दक्षयज्ञं व्यनाशयत् ।
पलायन्तेस्म देवाश्च भयाद्रुद्रस्य कल्पिताः ॥ २० ॥
कृत्तिवासाः जगामाथ हिमवन्तं नगेश्वरम् ।
ततश्च तारकेनापि कामेन सर्वपुष्टिदम् ॥ २१ ॥
साऽपि साध्वी हिमवतो जाता कमललोचना ।
पूजयामास तं देवं प्रेषिता जनकेन च ॥ २२ ॥
कन्दर्पस्तत्र गत्वा च ब्रह्मण्यस्य तपस्विनः ।
पार्वतीसम्मुखं देवं प्रेषयामास कार्मुकान् ॥ २३ ॥
धृते धनुषि कामेन सशरे कृत्तिवाससः ।
तृतीयचक्षुषो वह्निः पपात मदनोपरि ॥ २४ ॥
दग्धकामशरीरोऽसौ महादेवो जगद्गुरुः ।
ज्ञात्वा नारायणीं देवीं उपयेमे समाधिना ॥ २५ ॥
ततो नगे हिमवति तस्थौ देवो महेश्वरः ।
पार्वत्या सह स देवो विजहार यथासुखम् ॥ २६ ॥
मेनोवाचाऽथ तनयां स्थानं नास्त्यपि किं तव ।
युवां संगच्छतां स्थानं तवैतत् सुखदं न हि ॥ २७ ॥
स्त्रीणां पितृगृहे वासो निन्दितव्यः पुनः पुनः ।
जानतैवं भवेन्निन्दा न स्थेयं श्वशुरगृहे ॥ २८ ॥
इति श्रुत्वा हैमवती कोपप्रस्फुरिताधरा ।
बहुधा विलपन्ती सा भवायेदं जगाद ह ॥ २९ ॥
ईश्वरस्त्वं महाबाहो ! सर्वशक्तिसमन्वितः ।
स्थातुं स्थानं न मे आस्ते किमेतद्धि भवद्गृहे ॥ ३० ॥

देवदेव तवादेशात् स्थानमेकञ्च कल्पय ।
कृशानुरेताः तत् स्थाणुः स्थानं संत्यज्य सत्वरम् ।
ययौ सर्वगणैः सार्द्धं मध्यदेशं तदा शिवः ॥ ३१ ॥

पूर्वसागरगमिन्या गङ्गाया उत्तरे तटे ।
वाराणसीं नागपुरीं निर्ममे पार्वतीहिते ॥ ३२ ॥

तत्र तिष्ठन् जगन्नाथो नारदं पर्यपृच्छत् ।
एकान्तं परमं पुण्यं कुत्रारण्यं महामुने ॥ ३३ ॥

वाराणस्यां मम प्रीतिर्ततो निन्दाप्यनेकधा ।
गङ्गा सकलपापघ्नी यत्रास्ते मणिकर्णिका ॥ ३४ ॥

वाराण्स्यां तनुत्यागाद् ब्रह्मविद्या व बोधनात् ।
द्वाभ्यामेव भवेन्मुक्तिः नात्स्यन्यन्मुक्तिकारणम् ॥ ३५ ॥

इयं बहुजानाकीर्णा बभूव मुनिसत्तम !
अतो मनो न रमते मम नारद ! निश्चितम् ॥ ३६ ॥

इत्युक्त्वा नारदेनासौ स ययावाम्रकं वनम् ।
लिङ्गरूपधरस्तस्थौ नत्वा श्रीपुरुषोत्तमम् ॥ ३७ ॥

ज्ञात्वा तत् सर्ववृतान्तं हिमवान् पर्वताधिपः ।
स्त्रीभिः सर्वपरिवृतो मैनाकेन च मेनया ॥ ३८ ॥

गङ्गया लोकपावन्या मुनिभिस्तत्त्वदर्शिभिः ।
आजगाम वनश्रेष्ठमाश्रमं मुनिसत्तमाः ॥ ३९ ॥

बिन्दुतीर्थे गिरौः स्नात्वा दृष्ट्वा नारायणं हरिम् ।
देवस्य द्वारमासाद्य स्तौति स्तुत्याऽनया तदा ॥ ४० ॥

हेमबाहुरुवाच

आदिकन्द ! नमस्तुभ्यं नमस्तेऽव्यक्तयोनये ।
कामचारणसिंहाय सर्वेप्सितप्रदाय च ॥ ४१ ॥
भक्तप्रियः नमस्तुभ्यं विष्णुचक्रप्रदाय च ।
त्रिपुरघ्नः नमस्तेस्तु नानासुरवरप्रद ॥ ४२ ॥
नागार्जुन - सहायस्त्वं काशीराजवरप्रद !
विद्यागोप्ता लोकसाक्षी अन्धकदीपकेशरी ॥ ४३ ॥
नमो मोक्षप्रदात्रे च भगीरथवरप्रद !
नीलकण्ठ नमस्तुभ्यम् उमाप्रियकृते नमः ॥ ४४ ॥
नमस्ते सच्चिदानन्द ! कुमारगुरवे नमः ।
रामचन्द्रप्रतिष्ठात्रे पञ्च ब्रह्म नमोऽस्तुते ॥ ४५ ॥
क्षेत्रेशपरमेशान ह्यपराधः कुतो मया ।
इदानीं करुणापङ्गैः पूरयस्व मनोरथम् ॥ ४६ ॥
इति स्तुत्वा बहुभिः वचोभिर्नीललोहितम् ।
पपात भूभृतां श्रेष्ठः तदा स अवनीतले ॥ ४७ ॥
ततो दृष्ट्वा गिरिवरममृताक्षरभाषिणम् ।
स्तुत्वा नम्रेण सन्तुष्टो महादेवोऽभ्यभाषत ॥ ४८ ॥
किमिच्छसि गिरिश्रेष्ठ ! किं हि कामं यथेप्सितम् ।
सन्तुष्टो वरदोऽहं च स्तोत्रेणानेन वाऽनघ ॥ ४९ ॥
इति श्रुत्वा वचस्तस्य धूर्जटेः हिमवांस्तदा ।
बध्वाञ्जलिं करपुटे वाचमूचे प्रियम्बदाम् ॥ ५० ॥

अस्मिन् क्षेत्रे जगन्नाथ ! त्वदीयं लिङ्गमुत्तमम् ।
दिदृक्षुरस्मि तत्राहं प्रसादं कुरु धूर्जटे ! ॥ ५१ ॥
यतो मे वेश्म संत्यज्य आगतस्त्वं सहोमया ।
अतो दिदृक्षुः स्त्रीं साध्वीम् आगतोऽहं त्वदालयम् ॥ ५२ ॥
एतस्यां महतीं प्रीतिं पृष्ट्वा वन्धु जनस्य मे ।
जायते महती प्रीतिरनुरागो विवर्धते ॥ ५३ ॥
अधुना बहुभिः रत्नैः प्रासादं करवाणि ते ।
आज्ञापय महेशान ! यद्यस्ति करुणा मयि ॥ ५४ ॥
गिरीन्द्रमथ देवेशो वाक्यमेतदुवाच ह ।
दुर्लभं देवताभिश्च किं त्वया प्रोषितं गिरे ॥ ५५ ॥
ब्रह्मणा विष्णुनेत्रेण अनेन वरुणेन च ।
प्रासादस्तु ह्यसाध्योऽयं कलौ चन्द्रः करिष्यति ॥ ५६ ॥
इदानीं मत्समं लिङ्गं केदारेश्वरसंज्ञकम् ।
सिद्धेश्वरसमीपे च प्रसादं कुरु सुव्रत ॥ ५७ ॥
तत्राऽहं सर्वभावेन साधकानां वरप्रदः ।
तत्र ते तनया गौरी ह्यस्मत्प्रीतिविवर्द्धिनी ॥ ५८॥
आस्ते लोकोपकाराय क्रतुं कृत्वा स्वपाणिना ।
रूपं सौम्यप्रदं सूक्ष्मं विविक्तं सुमनोहरम् ॥ ५९ ॥
मन्त्रेणानेन विधिवद् विभज्योत्कुण्डवारिणि ।
गौरी कृतः नमस्तुभ्यं सर्वकामफलप्रदम् ॥ ६० ॥
पापापनोदं कुरु मे निमज्जेऽहं तवाम्भसि ।
इत्युक्त्वा त्रीणि वारीणि निमज्जेत तु वारिणि ॥ ६१ ॥

कृताञ्जलिपुटो भूत्वा देवस्तोत्रमुदीरयेत् ।
दक्षिणाम्ूये तुभ्यं वटमूलनिवासिने ॥ ६२ ॥
ध्यानैकनिरताङ्गाय नमो रुद्राय ते नमः ॥ ६३ ॥
एवं यः कुरुते धीमान् शुचिस्तद्गतमानसः ।
कैलासभुवनं याति स नरो नात्र संशयः ॥ ६४ ॥
नवम्यां शुक्लपक्षस्य इषे मासि विशेषतः ।
दत्वा कृष्ण तिलान् मूर्ध्नि यो मज्जेत् पार्वतीह्रदे ॥ ६५ ॥
स यात्याखण्डलस्थानं विमानेन विराजितः ।
शुचिरूर्ध्वगतिस्तत्र ब्रह्मणः सदनं परम् ॥ ६६ ॥
गच्छ तत्र गिरिश्रेष्ठ ! कुरुष्वाचमनं मम ।
पूजयस्व प्रयत्नेन मदीयं लिङ्गमुत्तमम् ॥ ६७ ॥
वाचमित्येव स प्राह गिरीशं प्रहसन्निव ।
यास्ये तद्वचनं शम्भो ! करवाणि न संशयः ॥ ६८ ॥
इत्युक्त्वा गोत्रराजाऽसौ प्रासादं बहुविस्तृतम् ।
प्राङ्गणैः विततै र्युक्तं तोरणैश्च समन्ततः ॥ ७० ॥
बहुकोशप्रपूर्णञ्च छत्रव्यजनसङ्कुलम् ।
चकार विधिवत् प्राज्ञो येन तुष्यति शङ्करः ॥ ७१ ॥
पूजां तत्र महेशस्य कृत्वा स्तुत्वा प्रणम्य च ।
तदादि कृतकृत्योऽभूत् समस्तैर्बान्धवैर्वृतः ॥ ७२ ॥
ततो गन्धवतीनाम्नीं गंगां चात्र विसृज्य च ।
ययौ गोत्रकुलश्रेष्ठः स्वस्थानं हरमुक्तये ॥ ७३ ॥
एतत्तीर्थवरमं विप्रा श्रुतमं त्रैलोक्य पावनम् ।
सर्वपापघ्नमतुलमं मुनीनां प्रीतिवर्धनम् ॥ ७४ ॥

योऽसौ वै दक्षिणामूर्तिः महेशस्य प्रकीर्तिता ।
तत्तुल्या कर्मभूमौ च फलदा नास्ति देवता ॥ ७५ ॥
तस्यैव सन्निधानेन रुद्रलिङ्गवरः स्वयम् ।
नामभिः पूजितश्चायं नामशान्तिशिवेति वा ॥ ७६ ॥
दृष्ट्वा शान्तशिवमं विप्रा सर्वशान्तिमवाप्नुन्यात् ।
शान्तात्मा विजितात्मा च याति सत्यं शिवालयम् ॥ ७७ ॥
नाम्ना शान्ताशिवोलिङ्गो दक्षिणामूर्तिरित्यसौ ।
एनं पूज्य नमस्कृत्य शिवसायुज्यमाप्नुयात् ॥ ७८ ॥
केदारेश्वरमाख्यानं य इदं कीर्तयेन्नरः ।
शृणुयाद्वा नरो यस्तु तस्य वै शाश्वती गतिः ॥ ७९ ॥

इति श्रीकपिलपुराणे केदारे हिमवदागमनं नाम

षोडशोऽध्यायः ॥ १६ ॥

उवाचसंख्या २ सार्द्ध श्लोकसंख्या २ पूर्ण श्लोकसंख्या ७९

●

सप्तदशोऽध्यायः

ऋषय ऊचुः

पुरा हिमवता त्यक्ता तत्र गन्धसरित् कथम् ।
एतन्नो वद विप्रर्षे ! कामदं सर्वमङ्गलम् ॥ १ ॥
तस्यास्तीरे पर्वताश्च लिङ्गानि विविधानि च ।
ब्रूहि नस्तीर्थयुक्तानि फल-दानान्यशेषतः ॥ २ ॥

भरद्वाज उवाच

कथयामि मुनिश्रेष्ठा यूयं यत् परिपृच्छथ ।
शृणु तैकमनोयुक्ता यदि श्रद्धा च वर्तते ॥ ३ ॥
न सन्ति त्रिषु लोकेषु नद्यो गन्धवतीसमाः ।
यस्या दर्शनमात्रेण नरो मुच्येत कल्मषात् ॥ ४ ॥
आसाद्य यां पुरा विप्रा ययुः सप्तर्षयो दिवम् ।
पावनीं सर्वभूतानां तां नदीं को न संश्रयेत् ॥ ५ ॥
आजगाम यदा विप्रा हिमवान् पार्वताधिपः ।
तदाऽत्र देवं सम्पूज्य केदारेश्वरमुत्तमम् ॥ ६ ॥
क्ष्माभृत्प्रभुः कृतार्थात्मा तल्लिङ्गार्चनजैः सुखैः ।
ननन्दारमुवाचेदं जाह्नवीं गिरिशप्रियाम् ॥ ७ ॥

गङ्गे भागीरथीनाम्ना यथाऽऽख्यास्ति तवाच्युते !
तथा हैमवतीनाम्ना इति मामं मुनयोऽवदन् ॥ ८ ॥
त्वयेत्यलङ्कृतोऽहञ्च बहुपुत्रोऽपि निम्नगे !
बहुरत्नैः पयोभिश्च यथा कुमुदवान्धवः ॥ ९ ॥
क्षेत्रेऽस्मिन्नधुना गङ्गे ! कीर्तिः परमशाश्वती ।
मम स्थापितपापघ्ने ! त्वमत्र स्थितिमाचर ॥ १० ॥
गङ्गा च नवधा प्रोक्ता ह्यधुना दशधा भव ।
ब्रह्महत्यादिपापानां नाशिनीपुण्यवर्द्धिनी ॥ ११ ॥
आद्या गोदावरी गङ्गा द्वितीया या पुनः पुनः ।
तृतीया कथिता रेवा चतुर्थी जाह्नवी स्मृता ॥ १२ ॥
कावेरी पञ्चमी प्रोक्ता षष्ठी वै गोमती तथा ।
कृष्णा च सप्तमी प्रोक्ता ब्राह्मी ह्यष्टम्युदाहृता ॥ १३ ॥
नवमी वै वैतरणी नवधा चेति विश्रुता ।
अधुनैकात्रके देवि सशरीरा तव शुभे ॥ १४ ॥
गोदावरी गोमती च कृष्णा चैव पुनः पुनः ।
ब्राह्मी रेवा च कावेरी तथा वैतरणी स्मृता ॥ १५ ॥
जाह्नवी च ततः प्रोक्ता ततो गङ्गा महासरित् ।
इत्येता दशधारा च क्षेत्रेऽस्मिन् तु सुरार्चिते ॥ १६ ॥
इति तस्य वचः श्रुत्वा गङ्गोवाच हिमालयम् ।
यूयं मे गुरवस्तात ! करवाणि वचस्तव ॥ १७ ॥
ख्यातिं चात्र गमिष्यामि केन नाम्ना गिरीश्वर !
तन्नाम वद मां शीघ्रं यद्येवं प्रीतिरस्तिते ॥ १८ ॥

हिमवानुवाच

काननोद्भवपुष्पाणां केतकीनां लतान्तरे ।
केशराणां च पद्मानां चम्पकानां विशेषतः ॥ १९ ॥
फलानां वायुसंसर्गाद् गन्धलाभाद् महीतले ।
नाम्ना गन्धवती गङ्गे ! भवैकाम्रवने शुभे ॥ २० ॥
अत एव मम प्रीति र्भविता महतो त्वयि ।
शङ्करस्त्वयि सन्तुष्टो भविता नात्र संशयः ॥ २१ ॥
वाचमित्येव सा प्राह हिमवन्तं नगोत्तमम् ।
ववाह दक्षिणे गङ्गा सागरं काननान्तरे ॥ २२ ॥
ततो वै पुष्पवृष्टिस्तु शक्रादिकरसंच्युता ।
पपात हिमवन्मूर्ध्नि देवदुन्दुभिपूर्वकम् ॥ २३ ॥
कृतकृत्यस्ततो ग्रीवो जगाम स्वाश्रमं द्विजाः ।
गङ्गा गन्धवती नाम्ना दक्षिणार्णवगामिनी ॥ २४ ॥
एवं मया निगदिता नाम्ना गन्धवती सरित् ।
एकाम्रके वने विप्रा गङ्गा प्रच्छन्नरूपिणी ॥ २५ ॥
पुनराख्यानकं वक्ष्ये गन्धनद्या महीसुराः ।
श्रुत्वा पापक्षयं याति सुकृतं चापि वर्द्धते ॥ २६ ॥
पुरा श्रुता मया विप्रा या कथा पुलहाश्रमे ।
तामहं सम्प्रवक्ष्यामि शृणुध्वं चैकचेतसः ॥ २७ ॥
अथैकदा हि देवर्षिः तिष्ठासुर्मुनिसत्तमाः ।
बदरिकाश्रमे पुण्ये ययौ तत्र च नारदः ॥ २८

दृष्ट्वा च मुनयः सर्वे नारदं योगिनाम्वरम् ।
बलिभिर्बहुभिश्चैव सन्तोष्यैवं तमब्रुवन् ॥ २९ ॥

ऋषय ऊचुः

दर्शनेन त्वदीयेन देवर्षे ! मुनिपुङ्गव !
कृतार्थाश्च भवामोऽद्य तीर्थं शुश्रूषवो वयम् ॥ ३० ॥
कस्मिन् क्षेत्रेऽथवा तीर्थे नद्यां कस्यां द्विजोतमाः ।
धर्मो नानाविधः प्रोक्तः स्वल्पोऽप्यक्षयमेधते ॥ ३१ ॥
शिवाश्रमाणि रम्याणि कस्मिन् सन्ति महोदधौ ।
कुत्र पुण्यतमे क्षेत्रे नृभि र्मुक्तिरवाप्यते ॥ ३२ ॥

नारद उवाच

नाना क्षेत्राणि तीर्थानि नद्यस्तु बहवस्तथा ।
तिष्ठन्ति हि महीपृष्ठे पापिनां सिद्धिहेतवे ॥ ३३ ॥
तथापि स्थानमेकन्तु विविक्तं चक्रपाणिनः ।
तत्र ते च सर्वगुणा यद् यूयमं परिपृच्छथ ॥ ३४ ॥
महोदधेरुत्तरतः त्रिभिर्योजनमायतम् ।
एकाम्रकं वनं चास्ति आगतानां रतिप्रदम् ॥ ३५ ॥
स्वर्णवर्णगिरिरम्ये कोटिलिङ्गावृतो विभुः ।
भूतेशश्च महाभाग आस्ते तत्र महाहरः ॥ ३६ ॥
अक्षयश्च भवेत् सर्वं नूनं वित्तं प्रकल्पितम् ।
प्रवत्त कन्यावस्त्रादि मधुसर्पिगुणादिकम् ॥ ३७ ॥
तत्क्षेत्रेसर्वदानेभ्यो ह्यन्नदानं विशिष्यते ।
अन्नदानात् परमंदानं नास्त्यन्यत् पृथिवीतले ॥ ३८ ॥

अन्नमासाद्य तिष्ठन्ति प्राणाश्चैव तु प्राणिनाम् ।
विनान्नेन न जीवन्ति प्राणिनः प्राणविह्वलाः ॥ ३९ ॥
तस्मादन्नप्रदातारः प्राणदातार एव हि ।
अर्थिभ्योऽन्नं प्रदातव्यं नार्थिभ्यश्च कदाचन ॥ ४० ॥
एवं सर्वाणि दानानि अर्थिभ्यश्च प्रदापयेत् ।
तस्मिन् क्षेत्रे वरे पुण्ये दानमल्पतरं बहु ॥ ४१ ॥
स्नानं सन्ध्यादिकं कर्म सर्वं वृहन्न संशयः ।
गङ्गादिकेषु तीर्थेषु वारणस्यां द्विजोत्तमाः ॥ ४२ ॥
या च कीर्तिः स्वर्णकूटे सा सिद्धिरेकवत्सरे ।
वाराणस्यां सहस्राब्दैं र्यत्फलं समवाप्नुयात् ॥ ४३ ॥
एकाम्रके दिनैकेन तत्फलं पश्य संयमे ।
प्रयागात् पुष्करात् काश्याः पञ्च पञ्च गयोच्यते ॥ ४४ ॥
प्रयाग—काशीफलदमेकाम्रं मुनिसत्तमाः ।
स्वर्णकूटाचले तस्मिन् पापिनां पुण्यकर्मणाम् ॥ ४५ ॥
तनुत्यागाद्भवेन्मुक्तिः किमत्र ह्यधिकं फलम् ।
त्यजन्ति तत्र ये वेहं तेषां कर्णे महेश्वरः ॥ ४६ ॥
मन्त्रं मुक्तिप्रदातारं ब्रह्म तारकमादिशेत् ।
तस्मिश्च वैष्णवे क्षेत्रे विष्णुस्तु परिपालकः ॥ ४७ ॥
तत्र विष्णुपराः सर्वे केचिन्माहेश्वरा जनाः ।
तत्र सिद्धैश्च सम्वादं गजानां परिशुश्रुमः ॥ ४८ ।
नकुलैर्जिह्मगानाञ्च माजरैराखुनान्तथा ।
मित्राणि च यथा तत्र तथा शात्रव आत्मिकाः ॥ ४९ ॥

नान्योन्यं विरुध्यन्ति तत्क्षेत्रस्य प्रभावतः ।
नानाविधान्याश्रमाणि तत्र सन्ति महेशितुः ॥ ५० ॥
पावकानि च तीर्थानि नदी विविधवाहिनी ।
तस्मिन्नास्ते क्षेत्रवरे नाम्ना गन्धवती सरित् ॥ ५१
आद्या गङ्गा समाख्यता त्रिकूटकलुषापहा ।
पुरा भगीरथेनाऽत्र तोषितस्तु सदाशिवः ॥ ५२ ॥
बभार शिरसा देवीं गङ्गां त्रैलोक्यपावनीम् ।
जटाकपाले रुद्रश्च श्राममाणः महातपाः ॥ ५३ ॥
नीता भगीरथेनात्र गङ्गा त्रैलोक्यपावनी ।
तां क्षेत्रमध्ये हिमवान् ससर्ज शिवभक्तये ॥ ५४ ॥
पावनार्थाय लोकानां कलिकल्मषनाशिनीम् ।
आद्यां गङ्गां विलसतीं त्रिकोटिकुलतारिणीम् ॥ ५५ ॥
पुण्यां गन्धवतीं नाम्ना मुनयो ब्रह्मवादिनः ।
पापिष्ठा ये च पाखण्डा तथा ब्राह्मणनिन्दकाः ॥ ५६ ॥
गुरुभक्तिविहीनास्ते स्नात्वा तत्र दिवङ्गताः ।
कलौ गन्धवती नाम्ना कृते भागीरथीति च ॥ ५७ ॥
त्रेतायां जह्नुतनया द्वापरे हरिपादजा ।
एवं नामानि च पुरा कीर्तितानि मनीषिभिः ॥ ५८ ॥
चत्वारि त्रिषु लोकेषु चतुर्षु च युगेषु च ।
कलावन्तर्हिता गङ्गा त्रैलोक्यपावनी हि सा ॥ ५९ ॥
नरकं याति पापीयान् ब्रह्मस्वहारको यथा ।
तस्याः सरिद्वारायास्तु स्नानमन्त्रनिरोधतः ॥ ६० ॥

यस्याः संस्पर्शनादेव स्वर्गादिसुखमाप्नुयात् ।
गुप्तगङ्गे ! नमस्तुभ्यम् ऋषिदेवाभिवन्दिते ॥ ६१ ॥
निमज्जेऽहं महाभोगे मां समुद्धर पातकात् ।
इत्युक्त्वा मज्जयेत्तस्यां शम्भवि कलुषापहे ॥ ६२ ॥
विशेषतः कलियुगे त्रिकोटिकुलपावनी ।
ततः पापानि संत्यज्य ब्रह्महत्यादिकानि च ॥ ६३ ॥
जिह्मीते त्रिदिवं सत्यं शृणुध्वं मुनिसत्तमाः ।
गन्धवत्यां नरः स्नात्वा कृतकृत्यो भवेद् ध्रुवम् ॥ ६४ ॥
सर्वपापयुतो धीमान् गङ्गायां पिण्डदो यथा ।
तस्यास्तीरे महेशस्तु पर्जन्येश्वरविश्रुतः ॥ ६५ ॥
पूज्यपूज्यः पुरा सौर्ये वीतये कृतिवाससः ।
तस्यां स्नात्वा च दृष्ट्वा पूजयित्वा विधानतः ॥ ६६ ॥
नरः पापक्षयं कृत्वा राजसूयफलं लभेत् ।
तत्र मेधेश्वरं तीर्थं पापघ्नं पुण्यवर्द्धनम् ॥ ६७ ॥
तस्मिन् स्नात्वा नरो विप्राः शिवसालोक्यमाप्नुयात् ।
तस्यास्तीरेषु लिङ्गं च ब्रह्मणाऽराधितं पुरा ॥ ६८ ॥
ब्रह्मेश्वरमिति ख्यातं ब्रह्मलोकप्रदायकम् ।
ब्रह्मयज्ञोद्भवं तीर्थं तत्रास्ते जनपावनम् ॥ ६९ ॥
तत्र स्नात्वा महेशस्य पूजनादधनाशनम् ।
स्नात्वा गन्धवतीतीर्थे दृष्ट्वा ब्रह्मेश्वरं हरम् ॥ ७० ॥
स्वकुलैरेकविंशत्या ब्रह्मलोकमवाप्नुयात् ।
गोकर्णेश्वरलिङ्गन्तु पुनस्तस्यास्तटे श्रुतम् ॥ ७१ ॥

सुधानाम्नैव पूज्यं तत् गोकर्णेनासुरेण च ।
गन्धनद्यां नरः स्नात्वा गोकर्णेश्वरमीश्वरम् ॥ ७२ ॥

शिवप्रीतिमवाप्नोति मन्त्रसिद्धिमवाप्नुयात् ।
गन्धनद्यास्तटे विप्राः पुनरुत्पलकेश्वरम् ॥ ७३ ॥

तत्र स्नानं पुजनं च मुक्तिलक्षणमुच्यते ।
पुनस्तस्यास्तटे विप्रा लिङ्गं भूमीश्वरं स्मृतम् ॥ ७४ ॥

दर्शने तस्य लिङ्गस्य भवभीतिर्विनश्यति ।
तटे तस्यास्तु लिङ्गानि त्रीणि सन्ति महीसुराः ॥ ७५ ॥

सूक्ष्मेश्वरस्तु प्रथमस्तत्र वाताम्रकेश्वरः ।
अनयो लिङ्गयो र्मध्ये मध्यमेश्वरसंज्ञकः ॥ ७६ ॥

सूक्ष्ममेवं समासाद्य ब्रह्मसायुज्यमश्नुते ।
पिण्डदानादिकं तत्र पितृणां मुक्तिकारकम् ॥ ७७ ॥

तत्र पिण्डानि वितरन् पितृभिः सह मोदते ।
विशेषं कथयामि त्वां स्थानं तस्यां महीसुराः ॥ ७८ ॥

यत्र सूक्ष्मेश्वरो देवस्तत्र सा मुक्तिदायिनी ।
कलावन्तर्हिता गङ्गा दक्षिणां दिशमाश्रिता ॥ ७९ ॥

अहो गन्धवती पुण्या त्रिकोटिकुलपावनी ।
सकृत् स्नात्वा नरस्तस्यां जिहीते ब्रह्मणः पदम् ॥ ८० ॥

इत्युक्त्वा नारदो धीमान् ययौ ब्रह्मगृहं ततः ।
गतेऽस्मिन्नारदे विप्राः सानन्दं मुनयो ययुः ॥ ८१ ॥

ततस्ते क्षेत्रमागत्य मुनयो हि जितेन्द्रियाः ।
चक्रुः स्नानं गन्धवत्यां ददृशुर्लिङ्गमीश्वरम् ॥ ८२ ॥

तर्पयित्वा शुद्धजले पितृनथ पितामहान् ।
पिण्डदानादिकं तत्र चक्रुस्ते सुसमाहिताः ॥ ८३ ॥
ततोऽत्र सुविमानानि जाम्बूनदनिभानि च ।
सहस्राणि स्वरूपाणि आगतानि महीतलम् ॥ ८४ ॥
तानारुह्य तदा विप्रा मुनयो ब्रह्मणः पदम् ।
ययुःसर्वकुलैः सार्द्धं दशसप्तशतेन च ॥ ८५ ॥
अहोभाग्यमहोभाग्यं मुनीनां व्रह्मवादिनाम् ।
सकृद्गन्धवतीस्नानं दुरितौघविनाशनम् ॥ ८६ ॥
कैलाशनिलया विप्राः पाथेयं च मया श्रुतम् ।
भवतां प्रीतये नूनं कथिता पुण्यवर्द्धिनी ॥ ८७ ॥
माहात्म्यं गन्धवत्याश्च श्रुत्वा पापं विनश्यति ।
दीर्घमायुरवाप्नोति सुकृतस्यापि वृंहणम् ॥ ८८ ॥
यः शृणोति नरस्त्वेतदमाख्यानं पुण्यवर्द्धनम् ।
धनस्य सन्ततेस्तस्य विच्छेदो नैव जायते ॥ ८९ ॥

इति श्रीकपिलपुराणे गन्धवत्यनुवर्णनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

उवाचसंख्या २ सार्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या ८९

अष्टादशोऽध्यायः

अथ प्रक्ष्यामि महेशतीर्थं
श्रीपार्वतीपादविनिःसृतश्च ।
कीर्तिश्च वासं विनिहत्य तीर्थं
चकार देवी जनपावनाय ॥ १ ॥

देवीपदद्वयं तीर्थं स्वर्णकूटे द्विजोत्तमाः ।
आस्ते सर्वपवित्रं च सरः सर्वनमस्कृतम् ॥ २ ॥

ऋषय ऊचुः

कीर्तिः कस्य सुतोः विप्र ! स कुत्र स्थितवान् पुरा ।
वासश्चैवेति कः प्रोक्तः कया देव्या हतावुभौ ॥ ३ ॥

कस्त्वकार्षीत् तीर्थवरं देवीपदविनिर्मितम् ।
विस्तरं वै महापुण्यां त्वं कथां कथयाऽशु नः ॥ ४ ॥

प्रवक्ष्यामि मुनिश्रेष्ठाः कीर्तिर्नाम महासुरः ।
दुर्भिलस्य सुतो धीरो यादसश्च विनाशकः ॥ ५ ॥

दुर्धर्षो दुर्विनीतश्च देवब्राह्मणकण्टकः ।
वासश्चैवेति तद्भ्राता विश्वस्य निधनोद्यतः ॥ ६ ॥

शतमेकोत्तरं तस्य भ्रातारः परिकीर्तिताः ।
सर्वे भीमबलाः भीमाः सह पर्वतवासिनः ॥ ७ ॥

परिहाय च तान् भातॄन् मृगव्याजेन हंसकः ।
त्रासितः सततं पित्रा ययावेकाम्रकं वनम् ॥ ८ ॥
तत्र दृष्ट्वा भगवती सहवासमयाचत ।
उवाचार्ये ! मम प्राणं देहि सुन्दरि ! रक्ष माम् ॥ ९ ॥
अहं कीर्तिरयं वासो नास्ति लोकेषु मत्समः ।
ऐश्वर्यगुणरूपाढ्यः सौभाग्यबलपूजितः ॥ १० ॥
सीदामि त्वामहं दृष्ट्वा त्राहि मां वरवर्णिनि !
रक्ष मामरविन्दाक्षि ! त्वं स्वं गात्रं प्रयच्छ मे ॥ ११ ॥
शोभिणं तु इमौ पादौ यमो धृत्वा विभर्त्युत ।
तस्मिन् हते प्रिया नित्यं भवेयं नाऽत्र संशयः ॥ १२ ॥
इति तस्याः वचः श्रुत्वा सुहृष्टौ दुर्भिलात्मजौ ।
शक्तिभूतौ तदा धीरौ गिरिराजेन्द्रनन्दिनी ॥ १३ ॥
ततो सव्येन पादेन वासं जघ्ने महासुरम् ।
कीर्ति वासुरराजं च देवा हर्षमवाप्नुवन् ॥ १४ ॥
स्फटिकामलपृष्ठे च पापघ्ने शिरसद्मनि ।
समागत्य ततो देवाः स्थानं चक्रुर्दिवौकसः ॥ १५ ॥
प्रीतये तत्र देव्यास्तु तीर्थं त्रैलोक्यपावनम् ।
मुनिभिर्बहुभिर्वन्द्यं लोकत्रयफलप्रदम् ॥ १६ ॥
फाल्गुनस्यासिताष्टम्यां स्नात्वा देवीपदे नरः ।
गोपालनसमं भक्त्याऽभीष्टकाममवाप्नुयात् ॥ १७ ॥
एवं बहूनि तीर्थानि तत्र सन्ति द्विजोत्तमाः ।
किमन्यत् कथयिष्यामि क्षेत्रे तस्मिन् फलप्रदे ॥ १८ ॥

पवित्राणि च नामानि प्रवक्ष्यामि महीसुराः ।
येषां स्मरणमात्रेण निष्पापो जायते नरः ॥ १९ ॥
स्वर्णकूटो रसालश्च मेध्योष्मशिरसद्म च ।
लघ्वर्जितसिद्धशैलश्च स्वर्गस्थास्तपसरस्थली ॥ २० ॥
नामान्येतानि शस्तानि पुण्यान्यघहराणि च ।
स्मर्तव्यं प्रातरुत्थाय सुखं नयति तद्दिनम् ॥ २१ ॥

कपिल उवाच

राजन्निदं वचः श्रुत्वा भरद्वाजस्य ते द्विजाः ।
सानन्दा मुनयः सर्वे पुनः पप्रच्छुरादरात् ॥ २२ ॥

मुनय ऊचुः

भगवन् ! श्रोतुमिच्छामः स्वर्णकूटे शिवालये ।
चातुर्मास्यव्रतेनैव किं वा फलमवाप्नुयात् ॥ २३ ॥
तत्र दानेन किं पुण्यं तपसा वाऽथ किं फलम् ।
अन्नदानेन किं पुण्यं व्रतं केन समाचरेत् ॥ २४ ॥

भरद्वाज उवाच

कथयामि महापुण्यं चातुर्मास्यविधिं द्विजाः ।
दिनेनैकेन क्षेत्रेऽस्मिन् काशीवासफलप्रदम् ॥ २५ ॥
करोत्येकाम्रके क्षेत्रे चातुर्मास्यं तु यः पुमान् ।
फलं काश्याः शतगुणं सहस्राधिकमाप्नुयात् ॥ २६ ॥
केदारे यत्फलं प्राप्तं यत्फलं पुरुषोत्तमे ।
तत्फलं कोटिगुणितं स्वर्णकूटाचले द्विजाः ॥ २७ ॥
कुरुक्षेत्रे चतुर्भिश्च ग्रहणे चन्द्रसूर्ययोः ।
एकाम्रे तत्फलं प्रोक्तं चातुर्मास्ये न संशयः ॥ २८ ॥

गोदावर्यां तु गङ्गायां तपस्तप्त्वा तु यल्लभेत् ।
तत्फलं तु दिनैकेन चातुर्मास्ये शिवालये ॥ २९ ॥
शयनान्तरमारभ्य यस्तस्मिन् निवसेन्नरः ।
वाराणास्याः प्रयागस्य फलं तत्राधिकं लभेत् ॥ ३० ॥
यत्र सन्निहितो विष्णु र्वासवादिभिरावृतः ।
कस्तस्य शक्नुयाद्वक्तुं महात्म्यं विधिविस्तरम् ॥ ३१ ॥
कीर्तिवासास्तु यत्रास्ते देवदेवः सहोमया ।
को वाऽस्य शक्नुयाद्वक्तुं महात्म्यं विधिविस्तरम् ॥ ३२ ॥
युगान्यष्टौ तपस्तप्त्वा काश्यां बहुसुदारुणम् ।
या गतिस्तामवाप्नोति चातुर्मास्ये शिवालये ॥ ३३ ॥
यो हरेः शयनादूर्ध्वमेकाम्रे निवसेद्दिनम् ।
या गतिः सांख्ययोगानां व्रतेनैतां गतिं स वै ॥ ३४ ॥
चातुर्मास्यविधिं वक्ष्ये शृणुध्वं मुनिसत्तमाः ।
आषाढ़दशमीं शुक्लां प्राप्य संकल्पमाचरेत् ॥ ३५ ॥
नवम्यामष्टतीर्थंञ्च कुर्वीत सुसमाहितः ।
वासुदेवपरो भूत्वा इमं मन्त्रमुदीरयेत् ॥ ३६ ॥
आजन्म दुरितानाञ्च क्षयाय मधुसूदन !
अष्टतीर्थंविधिं कुर्वे आज्ञापय जनार्दन ॥ ३७ ॥
इत्यनुज्ञाप्य गोविन्दं ततो विन्दुसरो व्रजेत् ।
तत्रापि वासुदेवञ्च इत्यनुज्ञामुदीरयेत् ॥ ३८ ॥
वासुदेव ! नमस्तुभ्यं वसुदेवात्मजप्रभो ?
स्नातुमिच्छामि देवेश ! सिद्धमात्रं प्रकल्पय ॥ ३९ ॥

वासुदेवं प्रार्थयित्वा ततो न्यासञ्च विन्यसेत् ।
हृदि स्कन्दं न्यसेद् विप्राः दक्षिणे नन्दिकेश्वरम् ॥४०॥
वामभागे महाकालं पृष्ठे देवमनन्तकम् ।
मूर्ध्नि न्यसेद्वासुदेवमेवं न्यासञ्च कारयेत् ॥४१॥
ततः शुद्धमना भूत्वा सपवित्र उदङ्मुखः ।
नाभिमात्रे जले स्थित्वा इमं मन्त्रमुदीरयेत् ॥४२॥
वासुदेव नमस्तुभ्यं वसुदेवात्मज प्रभो !
स्मानुमिच्छामि देवेश ! सिद्धिमात्रं प्रकल्पय ॥४३॥
विन्दूद्भव ! नमस्तुभ्यं महादेवेन निर्मित !
विश्वविन्दो जगद्दीप ! मज्जयामि तवाम्भसि ॥४४॥
अनेन मन्त्रयोगेन स्नानं कृत्वा महीसुराः ।
कृताञ्जलिपुटो भूत्वा मन्त्रेणानेन प्रार्थयेत् ॥४५॥
एष विश्वेश्वरो देव एषा वै मणिकर्णिका ।
कलावन्तर्हिता काशी मूर्ध्नि एव न संशयः ॥४६॥
एवं स्नात्वा विशुद्धात्मा दृष्ट्वा देवं त्रिलोचनम् ।
वायव्यां दिशि देवस्य व्रजेत् पापविनाशनम् ॥४७॥
देवस्याभिमुखो भूत्वा कृताञ्जलिपुटस्तदा ।
सान्निध्यं भवता पूर्वमादिष्टं शूलपाणिना ॥४८॥
प्रतिपेदेऽमितास्माकं निमज्जेऽहं ह्रदे तव ।
इत्युच्चार्यं जलङ्कृत्वा स्वस्थचित्त उदङ्मुख ॥४९॥
हृदि ध्यात्वा विरूपाक्षं ततो मन्त्रमनुस्मरेत् ।
जगद्धृत ! ह्यनाद्यन्त अशरीरः शरीरधृक् ॥५०॥

प्रसीद देव ! ईशान ! स्थिरा भक्तिरिहास्तु नः ।
मज्जये त्रीणि वाराणि पिवतोऽहं षडक्षरम् ॥५१॥

ततो गत्वा प्रयत्नेन पश्येत् त्रिभुवनेश्वरम् ।
अर्थेशान्यां दिशि भागे गङ्गायमुनमर्दिनी ॥५२॥

तस्यास्तटं समासाद्य पूर्वानुज्ञामुदीरयेत् ।
ततो जलान्तरं गत्वा सपवित्र उदङ्मुखः ॥५३॥

स्मृत्वा तु चन्द्रिकाकान्तं मन्त्रमेतदुदीरयेत् ।
गङ्गाधर ! नमस्तुभ्यं गङ्गायमुनसङ्गमे ॥५४॥

स्नात्वात्र हितमत्यर्थं ब्रह्मविष्णुशिवात्मकम् ।
मन्त्रेणनेन वै स्नात्वा तत्र गङ्गां समर्चयेत् ॥५५॥

ततः पश्येत् प्रयत्नेन लिङ्गं त्रिभूवनेश्वरम् ।
तथैशान्यां विगीशस्य कोटितीर्थंप्रपूरितम् ॥५६॥

पूर्वानुज्ञां तु वै स्मृत्वा ततो मन्त्रमुदीरयेत् ।
स्नानं जगदिदं कृत्स्नं यत्पुण्यं समुदीरयेत् ॥५७॥

तविहाप्यक्षयं पुण्यं ममास्तु त्रिपुरान्तक !
स्नात्वैवं विधिवत्तत्र दृष्ट्वा त्रिभुवनेश्वरम् ॥५८॥

पूर्वस्यां दिशि पूतात्मा देवं ब्रह्मेश्वरं यजेत् ।
स्मृत्वाप्यनुज्ञां पूर्वां च ततो मन्त्रमनुस्मरेत् ॥५९॥

नमोऽस्तु परमार्थाय प्रजानां पतये नमः ।
यजेऽत्र शम्भवे कुण्डे निमज्जेऽहं तवाज्ञया ॥६०॥

ततः त्रिभुवनेशं च दृष्ट्वा मेघेश्वरं व्रजेत् ।
पूर्वानुज्ञां तु वै स्मृत्वा ततो मन्त्रमुदीरयेत् ॥६१॥

नमस्ते शितिकण्ठाय पर्जन्यपतये नमः ।
प्रसीद सुमुखो नाम यज्ञमेतमुदीक्षसे ॥६२॥
स्नात्वा तु विधिनाऽनेन दृष्ट्वा तं तु कपर्दिनम् ।
कौवेर्यां दिशि देवस्यालाम्बुकं तीर्थमाव्रजेत् ॥६३॥
समासाद्य तटं तस्य स्मृत्वाऽनुज्ञां तु पूर्ववत् ।
मज्जयेत् त्रीणि वाराणि मन्त्रेणानेन वै द्विजाः ॥६४॥
नमो वः ध्यानयोगाय शाश्वताय कपर्दिने ।
मनोरथफलावाप्ति पूरयस्व महेश्वर ॥६५॥
ततो गत्वा महेशानं दृष्ट्वा त्रिभुवनेश्वरम् ।
वन्दयित्वा नमस्कृत्वा व्रजेदुत्तरपर्वतम् ॥६६॥
रामेश्वर इति ख्यातस्तत्र स्नानं समाचरेत् ।
अनुज्ञां पूर्ववत् स्नात्वा मन्त्रमेतदुदीरयेत् ॥६७॥
वृषभस्योत्तरे तीरे शृङ्गे वसति दक्षिणे ।
अशोकवारनामा त्वं पापं हर नमोऽस्तु ते ॥६८॥
विधिनाऽनेन वै स्नात्वा दृष्ट्वा श्रीकीर्तिवाससम् ।
सर्वपापहरोदन्ते ज्योतिर्लोकमवाप्नुयात् ॥६९॥
एवं कृत्वाष्टन्या तीर्था चमनं मुनिसत्तमाः ।
दशम्यामेकभक्तं नक्तं वापि समाचरेत् ॥७०॥
रात्रौ तु शयनं कार्यं कुशानास्तीर्य भूतले ।
दशम्यामष्टतीर्थंश्च कुर्याद्वा च द्विजोत्तमाः ॥७१॥
पुनः प्रभातसमये एकादश्यां विचक्षणाः ।
कुर्याद् विन्दुसरस्नानं वन्दनं श्रीरमापतेः ॥ ७२ ॥

मौनी पूर्वमुखो भूत्वा ध्यात्वा श्रीचक्रिणं हृदि ।
अनुज्ञाप्य जगन्नाथं ततः संकल्पमाचरेत् ॥ ७३ ॥
निर्विघ्नेन यथा विष्णो ! चातुर्मास्यव्रतं मम ।
भवेत्तथाकुरुष्वाशु पापघ्नं पुण्यवृंहणम् ॥ ७४ ॥
एकादश्यां यतात्मा तु ह्यनुज्ञाप्येत्थमच्युतम् ।
गणानां त्वेति मन्त्रेण विघ्नराजं समर्चयेत् ॥ ७५ ॥
विघ्नराजं समर्च्यथ एकमेश्वरसन्निधौ ।
यथाकामेन संकल्प्य ततः कुर्यात् स वै व्रती ॥ ७६ ॥
ततः प्रतिदिनं विप्राः स्नानं कुर्यात् ह्रदोत्तमे ।
दर्शनं प्रत्यहं कुर्याद् व्रती श्रीकीर्तिवाससः ॥ ७७ ॥
देव्याश्च पादहरयोः तथाऽनन्तस्य भोद्विजाः !
भेदं न कारयेद् धीमान् ब्राह्मणः कीर्तिवाससः ॥ ७८ ॥
एषान्तु दर्शनं कुर्यात् प्रत्यहं व्रतिनाम्वरः ।
वर्जयेत् प्रथमे मासि शाकं विगतमत्सरः ॥ ७९ ॥
दधिवर्जं भाद्रपदे आश्विने वर्जयेत् पयः ।
कार्त्तिके मासि सम्प्राप्ते वर्ज्यो मांसो द्विजोत्तमाः ॥ ८० ॥
दीपदानन्तु वै कुर्यात् शिर उद्दिश्य प्रत्यहम् ।
स तु स्त्रियं न संवीक्षेद् वर्जयेत्तैलमामिषम् ॥ ८१ ॥
गते तु कार्तिके मासे संदीक्ष्या व्रतचारिणः ।
क्षुधार्तिभ्योऽन्नदानञ्च कर्तव्यं व्रतिना सदा ॥ ८२ ॥
अन्यतीर्थाद् विशिष्टं हि पुण्यं नूनमुदाहृतम् ।
तस्माद्दत्तप्रदत्तेभ्ये मुक्तिः तस्य करे स्थिता ॥ ८३ ॥

अन्नं प्रतिदिनं विप्राः ! दातव्यं पुण्यमिच्छता ।
सर्वन्तु विफलं तस्य क्षेत्रेऽस्मिन् विमुखे तिथौ ॥ ८४ ॥
सर्वदानादन्नदानं विशेषं समुदाहृतम् ।
तस्माद् विप्राः क्षेत्रवरे ह्यन्नदः सर्वदानदः ॥ ८५ ॥
अन्नदानात् परं दानं न भूतो न भविष्यति ।
गजाश्वरथदानेभ्यो ह्यन्नदानं विशिष्यते ॥ ८६ ॥
अन्नदं सर्वदं प्राहुः पूर्वं विद्याविचक्षणाः ।
अन्नदानं सदा काले कर्तव्यं शिवसद्मनि ॥ ८७ ॥
चातुर्मास्यव्रतं विप्रा य एवं कुरुते पुमान् ।
नारी वाथ द्विजश्रेष्ठाः ! स फलं लभते ध्रुवम् ॥ ८८ ॥
दिने दिनेऽश्वमेधस्य फलमाप्नोति मानवः ।
राजसूयस्य यज्ञस्य कार्तिके समुदाहृतम् ॥ ८९ ॥
धर्मार्थकाममोक्षार्थं समाप्नोति न संशयः ।
वेदज्ञो ब्राह्मणो धीमान् राजा च विजयी भवेत् ॥ ९० ॥
वैश्यो धनसमृद्धः स्यात् शूद्रः सद्गतिमाप्नुयात् ।
अन्यक्षेत्रे कृतं पापं शिवसद्मनि नाशयेत् ॥ १ ॥
ब्रह्महत्यादिपापानि अन्यक्षेत्रे कृतानि च ।
क्षयमायान्ति क्षेत्रेऽस्मिन् प्रविष्टे नरसत्तम ॥ ९२ ॥
अन्यक्षेत्रे कृतं पापं स्वर्णकूटे विनश्यति ।
स्वर्णकूटे कृतं पापं वज्रलेपं भवेद् ध्रुवम् ॥ ९३ ॥

ऋषय ऊचुः

अस्मिन् क्षेत्रे कृतं पापं वज्रलेपं भवेदिति ।
त्वयोक्तं यद् द्विजश्रेष्ठ ! तत्क्षयं केन वा भवेत् ॥ ९४ ॥

भरद्वाज उवाच

माघे मासे कृष्णापक्षे चतुर्दश्यां द्विजोत्तमाः !
क्षेत्रे प्रदक्षिणं कुर्याद् यो नरः संयतात्मवान् ॥ ९५ ॥
देवस्य दक्षिणे पूर्वे पश्चिमे चोत्तरे तथा ।
क्रोशमात्रं परं क्षेत्रं शिवस्य परमेष्ठिनः ॥ ९६ ॥
प्रदक्षिणाश्च यः कुर्याद् मेरुं सूर्यहरं द्विजाः !
तस्य क्षेत्रं कृतं पापं विनश्यति न संशयः ॥ ९७ ॥
तत्र मौनी भवेद्धीमान् कुर्यादनशनव्रतम् ।
दिनेनैकेन वै कुर्यात् तत्र सर्वं प्रदक्षिणम् ॥ ९८ ॥
नैव तिष्ठेत् क्षणमपि न हासं नैव रोदनम् ।
हासे च रोदने विप्रा विफलं वै प्रदक्षिणम् ॥ ९९ ॥
प्रदक्षिणेन क्षेत्रस्य कोटिजन्माघनाशनम् ।
द्वितीयेन द्वितीयस्य तृतीयेन त्रिजन्मना ॥१००॥
एकाम्रकृतपापानां क्षयाय द्विजसत्तमाः !
क्षेत्रप्रदक्षिणाच्चात्र नान्यः पन्थास्तु विद्यते ॥१०१॥
अन्यतीर्थे कृतं पापं स्वर्णकूटे विनश्यति ।
स्वर्णकूटे कृतं पापं विनश्यति प्रदक्षिणे ॥१०२॥

इति श्रीकपिलपुराणे भरद्वाज ऋषिसम्वादे चातुर्मास्य-
व्रतविधानं नामाष्टादशोऽध्यायः ॥ १८ ॥

उवाचसंख्या ८ अर्द्धश्लोकसंख्या × पूर्णश्लोकसंख्या १०२

अथैकोनविंशतिमोऽध्यायः

ऋषय ऊचुः

अस्मिन् क्षेत्रे द्विजश्रेष्ठ ! यात्रा यत्र समीरिताः ।
संक्षेपेण तु ता सर्वास्त्वमस्मान् कथय प्रभो ॥ १ ॥

भरद्वाज उवाच

तस्मिन्नेकाम्रकवने सप्त यात्राः प्रकीर्तिताः ।
अहं ताः कथयिष्यामि शृणुध्वं मुनिपुङ्गवाः ॥ २ ॥
मार्गशीर्षे कृष्णपक्षे या स्यात् प्रथममष्टमी ।
तत्र यात्रा समुद्दिष्टा देवदेवेन शम्भुना ॥ ३ ॥
आज्ञां वरुणभूपाय पुरा शम्भुः प्रदत्तवान् ।
समीपं तव लिङ्गस्य यास्यामि प्रथमाष्टमी ॥ ४ ॥
ततः प्रभृति भोविप्रा यात्रैका प्रथमाष्टमी ।
तत्र स्नानं जपो दानं सर्वं पापप्रणाशनम् ॥ ५ ॥
अथ नाम्नाऽभिधास्यामि यात्रां पापविनाशिनीम् ।
भास्कराय पुरा विप्रा आज्ञां दत्वा तु शम्भुना ॥ ६ ॥
शृणुध्वं मद्वचो राजन् ! तव प्रीत्यावदाम्यहम् ।
माघशुक्लस्य सप्तम्यां यात्रा पापविनाशिनी ॥ ७ ॥

तस्यां तिथौ सहस्रांशोस्तव लिङ्गस्य सन्निधिम् ।
यास्यामि च प्रदास्यामि लोकानां फलमुत्तमम् ॥ ८ ॥
तिलदानं तु तत्रोक्तं महापुण्यप्रदायकम् ।
तत्र श्रीभास्करेशस्य पूजनं मुक्तिलक्षम् ॥ ९ ॥
तथाऽन्यच्च प्रवक्ष्यामि कपिलस्य महात्मनः ।
लिङ्गस्य सन्निधानञ्च देवदेवस्य शूलिनः ॥ १० ॥
कपिले पूजिते लिङ्गे वरो दत्तः कपर्दिना ।
तत्राऽहं सर्वभावेन पूजां गृह्णामि वै मुने ॥ ११ ॥
फाल्गुनस्य सिते पक्षे यदा स्यात् सौरवासरः ।
तत्र यात्रां करिष्यामि शुभया च सहोमया ॥ १२ ॥
प्राणिनां तु प्रदास्यामि वाञ्छितं फलमुत्तमम् ।
पवित्रे कापिले क्षेत्रे भोक्तृणाञ्च विशेषतः ॥ १३ ॥
तैलं दत्वा शिरोगात्रमज्जनं कापिले ह्रदे ।
मन्त्रेणानेन विधिवत्तत्र स्नानं समाचरेत् ॥ १४ ॥
नमः कपिलतीर्थाङ्ग गङ्गाम्बुधिफलप्रद ।
पापं नाशय मे तीर्थ ! मज्जयेऽहं तवाम्भसि ॥ १५ ॥
इति मन्त्रं समुच्चार्य तत्र स्नानं समाचरेत् ।
ब्रह्महत्यादिपापानि नाशयेन्नात्र सशंयः ॥ १६ ॥
एवमुक्त्वा तु भगवान् तत्रैवान्तरधीयत ।
अथान्ययात्रां वक्ष्यामि अशोकाख्यां महाफलाम् ॥ १७ ॥
राधवाय पुरा विप्राः प्रसन्नो भगवानभूत् ।
उवाच मधुरं वाक्यं वाक्यज्ञश्चोत्तमौजसाम् ॥ १८ ॥

राम ! राम ! महाबाहो ! मद्वाक्यं शृणु राघव !
मोक्षाय सर्वभूतानां वक्ष्ये यात्रां महाफलाम् ॥ १९ ॥
चैत्रे मासि च सम्प्राप्ते यदा शुक्लाष्टमी भवेत् ।
याम्ये गिरिजया सार्द्धं मम लिङ्गस्य सन्निधौ ॥ २० ॥
रथस्थं तत्र मां दृष्ट्वा ब्रह्महत्यादिपातकैः ।
मुच्यते नाऽत्र सन्देहस्त्वपि चाण्डालयोनितः ॥ २१ ॥
ततः प्रभृति भो विप्रा अशोकास्या महाफला ।
अथान्याश्च प्रवक्ष्यामि यात्रां वै मदनान्तिकाम् ॥ २२ ॥
चैत्र-शुक्ल-चतुर्दश्यां मदनेनार्चयच्छिवम् ।
सर्वपापविनिर्मुक्तः शिवलोकं व्रजेद् ध्रुवम् ॥ २३ ॥
विशेषण तु कर्तव्या श्रीतीर्थेश्वरसन्निधौ ।
यात्रामथान्यां वक्ष्येऽहं प्रभो ! रामस्य सन्निधौ ॥ २४ ॥
रामेण पूजितं यच्च श्रीरामेश्वरसंज्ञकम् ।
तदेव लिङ्गं रामस्य यामदग्नस्य सम्मतम् ॥ २५ ॥
आषाढस्य च शुक्लायाम् अष्टभ्यां परिकीर्तिता ।
यामदग्नाय रामाय पुरा दत्तवरो हरः ॥ २६ ॥
प्राणिनां प्राणनाशाय यास्येऽहं तव सन्निधौ ।
अथान्यामभिधास्यामि द्वितीयाख्यां महाफलाम् ॥ २७ ॥
शुक्लपक्षे द्वितीयायां कार्तिकस्य विशेषतः ।
यात्रा कामप्रदा विप्राः श्रीयमेश्वरसन्निधौ ॥ २८ ॥
इत्येषा सप्तमी यात्रा कथिता सा महाव्रताः ।
ततः किमधिकं विप्राः पुराणं श्रोतुमिच्छथ ॥ २९ ॥

कपिल उवाच

तस्योक्तमिदमाकर्ण्य भरद्वाजस्य ते तदा ।
आनन्दाश्रुजलैर्युक्ता गमनं चक्रिरे वनम् ॥ ३० ॥
आद्ये च दिवसे सर्वे ययु र्वाराणसीं पुरीम् ।
स्नात्वा च जाह्नवीतोये ददृशु र्लिङ्गमुत्तमम् ॥ ३१ ॥
ततस्ते हर्षमतुलमावापु र्मुनिसत्तमाः ।
पुनस्तं पूजयामास देवदेवं महेश्वरम् ॥ ३२ ॥
द्वितीये दिवसे चैव गङ्गां प्रापु र्महीसुराः ।
पिण्डदानादिकं तत्र गादाधरकरे कृतम् ॥ ३३ ॥
ततो बहुदिने ते च प्रापुर्विरजमण्डलाम् ।
स्नात्वा वैतरणीतोये ददृशुः कोपरूपिणम् ॥ ३४ ॥
ततस्ते विरजां देवीं देवं मुक्तेश्वरं हरम् ।
अखण्डलेश्वरञ्चैव त्रिलोचनमहेश्वरम् ॥ ३५ ॥
ततो ब्राह्मीं नदीं प्रापुः पूर्वसागरगामिनीम् ।
सर्वपापक्षयकरीं स्नानं चक्रे द्विजोत्तमाः ॥ ३६ ॥
तृतीये दिवसे राजन् ! ययुरेकाम्रकं वनम् ।
तत्र गत्वा मुनिश्रेष्ठाः ! आश्रमाणि विलोक्य च ॥ ३७ ॥
सिद्धाश्रमं समाश्रित्य मुदं प्रापुर्महीपते !
एवं तीर्थं नृपश्रेष्ठ ! वरिष्ठे पुष्करे पुरा ॥ ३८ ॥
ऋषीणां चैव सम्वादं भरद्वाजेन धीमता ।
कथितं तच्च तुष्ट्यर्थमुत्कलं देशमुत्तमम् ॥ ३९ ॥

इदानीञ्च महीपाल ! किमन्यच्छ्रोतुमिच्छसि ।
य इदं परमं पुण्यं महात्म्यं चोत्कलस्य च ॥ ४० ॥
शृणोति हृष्टरोमा स पुण्यां गतिमाप्नुयात् ।
य इदञ्चोत्कलाख्यानं पठेन् मानवसत्तमः ॥ ४१ ॥
स याति परमं स्थानं देवादीनाञ्च दुर्लभम् ।
उत्कलस्य च माहात्म्यं ये शृण्वन्ति महीपते ॥ ४२ ॥
गोसहस्रप्रदानस्य ते नराः फलमाप्नुयुः ।
यस्त्विदं परमं पुण्यं करोति नरसत्तमः ॥ ४३ ॥
तस्य धर्मे स्थिता बुद्धिः न चलेत्तु कदाचन ॥ ४४ ॥

इति श्रीकपिलपुराणे भरद्वाजर्षिसम्वादे देवानां मुक्तिप्राप्तिर्नाम एकोनविंशतितमोऽध्यायः ॥ १९ ॥

उवाचसंख्या ३ अर्द्धश्लोकसंख्या १ पूर्णश्लोकसंख्या ४४

★

अथ विंशतितमोऽध्यायः

सत्यजिदुवाच

श्रुताः पुरातना धर्मा नदीनां वर्णनानि च ।
श्रुत्वा तीर्थान्यनेकानि पापं मे विलयं गतः ॥ १ ॥

श्रीकपिल उवाच.

सफलानि च क्षेत्राणि कथितानि मया पुरा ।
इदानीं कथयिष्यामि शृणु त्वमवनीपते ! ॥ २ ॥

कथिता या पुरा राजन् ! बह्वघघ्नी महानदी ।
तस्यास्तु तनयाऽख्याता दक्षिणे दक्षिणागमा ॥ ३ ॥

सा नदी भृगुणाऽऽनीता तपसा च महात्मना ।
ततः सा भार्गवी ख्याता गोसहस्रफलप्रदा ॥ ४ ॥

सिद्धेश्वरी समासाच्च तथासिद्धेश्वरीवधे ।
भार्गवी भृगुणाऽऽनीता गङ्गासमफलप्रदा ॥ ५ ॥

तस्यास्तटे महीपाल ! यत्र स्याच्छिवलिङ्गकम् ।
तत्र सा मोक्षदा ख्याता ह्याभिमुख्ये विशेषतः ॥ ६ ॥

स्नानमन्त्रं निबोध त्वं पुण्यं नृपतिसत्तम !
विफलं भवति स्नानं स्नानमन्त्रमृते यतः ॥ ७ ॥

भृगुकन्ये ! नमस्तुभ्यं गोसहस्रफलप्रदे ।
पापानि विलयं यान्तु मज्जने तव वारिणि ॥ ८ ॥
इत्युक्त्वा मज्जेयेत्तस्यां तर्पयेत् पितृदेवताः ।
प्राप्नोति परमं स्थानम् एकविंशतिपूरुषैः ॥ ९ ॥
तस्यास्तु तनया राजन् ! पुष्यभद्रेति विश्रुता ।
पूर्वस्यां दिशि सा ख्याता पूर्वसागरगामिनी ॥ १० ।
तस्यां स्नानं महीपाल ! कार्तिके सर्वकामदम् ।
तथा माघे तथाऽऽषाढ़े फाल्गुने च विशेषतः ॥ ११ ॥
पुष्यभद्रा नदी या तु सा कृष्णा नात्रसंशयः ।
शम्बरं निर्मलं यस्या वाञ्छन्ति पितृदेवताः ॥ १२ ॥
तस्या दुहितरमन्यां प्रवेक्ष्य भूभृताम्वर !
दधिनादेति विख्याता एकाम्रवनसन्निधौ ॥ १३ ॥
आनीता ऋषिणा चासौ तापसेन दधीचिना ।
तज्जले स्नानमात्रेण सोमलोकं व्रजेन्नरः ॥ १४ ॥
तत्रैव दृश्यते लिङ्गं व्योमकेशस्य भूपते !
तटे तस्याः प्रयत्नेन तत्र स्नानं समाचरेत् ॥ १५ ॥
अन्यस्नानाच्छतगुणं सहस्रगुणितं फलम् ।
प्राप्नोत्यभिमतं कामं स्नानकृन्नरसत्तम ! ॥ १६ ॥
महीपाल ! शृणुष्वं त्वं प्राचीं गुप्तसरस्वतीम् ।
यया कालाग्निना दग्धं रक्षितं सचराचरम् ॥ १७ ॥
एकाम्रकाननात् पूर्वे योजनान्ते महीपते !
नाम्ना प्राचीति विख्याता सरिदास्ते सरस्वती ॥ १८ ॥

प्राच्यां दिशि महेशस्य यत्र सागरसङ्गमः ।
क्रोशे क्रोशे तटे लिङ्गं ततः प्राची सरस्वती ॥ १९ ॥
तस्यां स्नात्वा महीपाल ! ज्योतिर्लोकं व्रजेन्नरः ।
सर्वपापविनिर्मुक्तः सप्तविंशतिपूरुषैः ॥ २० ॥
सर्वपुण्यप्रदा मान्या वैकुण्ठभवनप्रदा ।
साक्षात् सरस्वती प्राची नान्यस्यां नृपसत्तम ! ॥ २१ ॥
क्रोशे क्रोशे च लिङ्गानि तटे तस्या मनोरमे ।
सर्वत्र सुखसञ्चारे विद्वज्जनसुसेविते ॥ २२ ॥
तत्र विघ्नेवरो नाम विघ्नमूलाश्रितो हरः ।
तं दृष्ट्वा पूजयित्वा च नरः शिवमवाप्नुयात् ॥ २३ ॥
विघ्नशाखी महीपाल ! कल्पवृक्षसमो भुवि ।
तस्य प्रदक्षिणं कृत्वा मुच्यते ब्रह्महत्यया ॥ २४ ॥
त्रिवेणीसङ्गमं तत्र महापुण्यप्रदायकम् ।
तत्र स्नानं महीपाल ! माघमासे प्रकीर्तितम् ॥ २५ ॥
विशेषेण प्रवक्ष्यामि अमावस्याफलं महत् ।
स्नानं सन्ध्यातपोदानमक्षयं तु समीरितम् ॥ २६ ।
प्राच्यां तु पाण्डवे तीर्थे स्नानं कृत्वा विधानतः ।
स पापक्षयमादत्ते शिवसालोक्यतां व्रजेत् ॥ २७
महल्लिङ्गं प्रवक्ष्येऽहं तत्तटे ह्यमरेश्वरम् ।
अमरेशं समालोक्य न नरो भवतामियात् ॥ २८ ॥

तस्यास्तटे महेशस्तु कपिलेश्वरसंज्ञकः ।
सर्वपापहरो देवस्तल्लिङ्गं पूजितं मया ॥ २९ ॥
एवं बहूनि लिङ्गानि सन्ति तस्यास्तटे शुभे ।
कः शक्नोति गुणान् वक्तुं तस्याः प्राच्याः महीपते ! ॥३०॥
संक्षेपेण मयाऽख्यातं त्वत्प्रसङ्गाच्च पृच्छतः ॥ ३१ ॥

सत्यजिदुवाच

उत्कलस्य च माहात्म्यं श्रुतञ्च सकलं मया ॥ ३२ ॥
इदानीञ्च मुनिश्रेष्ठ ! ज्ञानयोगं वदस्व मे ॥ ३३ ॥

इति श्रीकपिलपुराणे उत्कलमाहात्म्यवर्णने
विंशतितमोऽध्यायः ॥ २० ॥

उवाचसंख्या ३ सार्द्धश्लोकसंख्या ३ पूर्णश्लोकसंख्या ३३

अथैकविंशतितमोऽध्यायः

कपिल उवाच

ज्ञानयोगं परं गुह्यं कथयामि नराधिप !
शृणुष्वैकमना भूत्वा यदि श्रद्धा प्रवर्त्तते ॥ १ ॥
नन्दिकेश्वरसम्वादे देवदेवेन शम्भुना ।
पुरा श्रुतं मया भूय इदानीं शृणु चानघ ! ॥ २ ॥
नमस्ते पार्वतीनाथ ! भक्तानां करुणाकर !
कथं विमुच्यते जन्तुः संसारात् कर्मबन्धनात् ॥ ३ ॥

महादेव उवाच

कामं क्रोधं परित्यज्य यो जन्तुः भजते हि माम् ।
परां मुक्तिं प्रयच्छामि तमहं नात्र संशयः ॥ ४ ॥
कामक्रोधौ यदा पुत्र ! परित्यजति मानवः ।
तदाऽस्य च हृदिस्थोऽयं प्रकाशमधिगच्छति ॥ ५ ॥
पुत्रदारसमायुक्ता ये चानन्दन्ति मानवाः ।
न जानन्ति परं ज्योतिः हृदयं नारायणं प्रभुम् ॥ ६ ॥

दमेन मोहितानार्या ये क्रीडन्ति नराधमाः ।
तेषां निरयवासश्च सत्यं सत्यं मयोदितम् ॥ ७ ॥
कामं क्रोधं मदं मोहं हिंसां पैशुन्यमेव च ।
अहङ्कारं तथा लोभं त्यज त्वं नन्दिकेश्वर ! ॥ ८ ॥
कर्मणा मानसा वाचा संकल्पं त्यजते तु यः ।
हरिनामजपेनैव भवाब्धिं तरते तु सः ॥ ९ ॥
हरिनामामृतञ्चास्ये कृत्वा वैष्णवसत्तमः ।
अतः सर्वमवाम्भोधि-कामसङ्कल्पवर्जिताः ॥ १० ॥
हरिर्यथा जगन्नाथस्तथाऽहं जगतां पतिः ।
आवयोरन्तरं नास्ति आकाशे पवनं यथा ॥ ११ ॥
हरेर्नाम हरेर्नाम कीर्तयस्व निरन्तरम् ।
ददाति परमां मुक्तिं सायुज्यं नाऽत्र संशयः ॥ १२ ॥
विश्वासः क्रियतां तस्मिन् हरौ त्रैलोक्यनायके ।
यस्य मायासमाविष्टो ब्रह्मा भ्रमति सर्वदा ॥ १३ ॥
जगदुपरि गोविन्दे मयि वातस्वरूपिणि ।
कुरु भक्तिं दृढां पुत्र ! मोक्ष्यसे दृढ़बन्धनात् ॥ १४ ॥
मयापि चार्यसे नाऽहं करोमि च करोति च ।
शङ्करः नीलकण्ठश्च श्रीधरो नीलविग्रहः ॥ १५ ॥
गौरीशो गोपिकाकान्तः ध्यायतामेकचेतसा ।
माधवस्योमाधवस्य किञ्चिद् भेदो न विद्यते ॥ १६ ॥
मूढा भेदं प्रकुर्वन्ति प्रपच्यन्ते हि रौरवे ॥ १७ ॥

कपिल उवाच

इत्युक्त्वा भगवान् शम्भुः ततस्तूष्णीम्बभूव ह ।
एवं ते पार्वतीनाथं नन्दी पुनरभाषत ॥ १८ ॥
वैष्णवानां च चिह्नानि तस्य विष्णोर्महात्मनः ।
ततोऽहं श्रोतुमिच्छामि वद मां करुणाकर ! ॥ १९ ॥
शङ्खचक्राङ्कितं देहं तुलसीदामभूषितम् ।

श्रीमहादेव उवाच

काम क्रोधपरित्यक्तं चिह्नं वैष्णावसंज्ञकम् ॥ २० ॥
एषां कौपीनकं श्रेष्ठं मुखे च मधुरं वचः ।
सर्वदानन्दहृदयं चिह्नं वैष्णवसंज्ञकम् ॥ २१ ॥
आनन्दाश्रुसमायुक्तमुच्चैर्गोविन्दकीर्तनम् ।
असङ्गस्य परित्यागश्चिह्नं वैष्णवसंज्ञकम् ॥ २३ ॥
सर्वस्वं नाम बुद्धित्वं सर्वसत्त्वसुखावहम् ।
दया-सत्य-समायुक्तं चिह्नं वैष्णवसंज्ञकम् ॥ २४ ॥
निर्ममं निरहङ्कारं देवता-ब्राह्मणार्चनम् ।
सतां सम्प्रीतिजननं चिह्नं वैष्णवसंज्ञकम् ॥ २५ ॥
एवं वैष्णवचिह्नानि यस्य सन्ति स वैष्णवः ।
अन्ये ये दाम्भिका लुब्धा तेषां लिङ्गं न कारणम् ॥ २६ ॥
इत्युक्त्वा भगवान् शम्भु गौरीक्रीडागुहान्तरम् ।
प्रतीहारी त्वसौ नन्दी तत्रास्ते धृतदण्डकः ॥ २७ ॥
नन्दिकेश्वरसम्वादमेवं देवेन शम्भुना ।
सर्वशान्तिकरं पुण्यं गुह्यं ते कथितं मया ॥ २८ ॥

अवैष्णवे न वाच्यस्तु देवब्राह्मणनिन्दकैः ।
ज्ञानयोगो मनोमले न वाच्यं संशयात्मनि ॥ २९ ॥
य इदं परमं गुह्यं ज्ञानयोगं पठेन्नरः ।
श्रृणुयादपि यो भक्त्या स शान्तिमधिगच्छति ॥ ३० ॥

इतिश्रीकपिलपुराणेउत्कलक्षेत्रोपाख्यानेचतुःक्षेत्रमाहात्म्यं
नामैकविंशतितमोऽध्यायः ।

अत्रोउवाचसंख्या ४ अर्द्धश्लोकसंख्या १ पूर्णश्लोकसंख्या ३०

समाप्तमिदं कपिलपुराणम्

कृत्याऽनयाऽभिनवया लोकः प्रसन्नतामियात् ।
भवानीसहितो देवो विश्वनाथः प्रसीदतु ।
पुराणोपपुराणानां प्रचारो येन जायताम् ।
तथा कुर्वन्तु विद्वांस इति मे प्रार्थना शुभा ॥

कपिलपुराण का हिन्दी में सारांश

पहला अध्याय

एक बार राजा सत्यजित् ने कपिलमुनि से कहा—महामुने ! मैंने पापनाशक पवित्र क्षेत्रों का कथानक आपसे सुन लिया। अब उत्कल देश में वर्तमान तीर्थ, देवता तथा उनके आश्रित अन्य वस्तुओं की विशेषता सुनना चाहता हूँ। आप सभी देवताओं के वन्द्य, पूज्य, पुराणों के ज्ञाता और सभी शास्त्रों के मर्मज्ञ विद्वान् हैं। अतः कृपया आप उन्हें बताकर मुझे कृतार्थ करें।

यह सुनकर कपिलजीने कहा—राजन् ! मैं उन क्षेत्रों की विशेषताओं को बतला रहा हूँ, जिनके स्मरणमात्र से समस्त कल्मष दूर हो जाते हैं। जिसप्रकार सभी वर्षों में भारतवर्ष सर्वश्रेष्ठ है उसीप्रकार सभी देशों में उत्कल देश उत्तम है। पृथ्वी पर उत्कल देश के समान कोई दूसरा देश उत्तम नहीं है। विद्वान् लोग इस सम्बन्ध में भरद्वाजमुनि के साथ ऋषियों के संवाद का उदाहरण देते हैं। वह इस प्रकार है—पुण्यमय पुष्कर क्षेत्र के निवासी निर्मलमानस मुनियों ने भरद्वाजमुनि से पूछा—भगवन् ! कृपया आप हमलोगों से इस क्षेत्र के पुण्य-पापों का वर्णन करें। इसके उत्तर में उन्होंने बताया कि जो मनुष्य इस पुनीत पुष्कर क्षेत्र में निवास करते हैं उनका महान् भाग्य है एवं उनका जीवन सफल माना जाता है। यहाँ जो भगवान् जनार्दन की अर्चना करते हैं उनके पाप नष्ट हो जाते हैं। परिणामस्वरूप वे शरीरान्त के बाद भगवान् विष्णु का पद प्राप्त कर लेते हैं। जो मनुष्य यहाँ रहने की इच्छा करते हैं, उन भाग्यवानों के माता-पिता का जीवन सफल हो जाता है। यहाँ श्रद्धापूर्वक जो द्विजातियों को दान देते हैं, वे मरने के बाद स्वर्ग

में जाकर निरन्तर निवास करते हैं। यहाँ किया हुआ थोड़ा सा पुण्य भी अधिक हो जाता है। अतः देवतालोग भी यहाँ रहने की निरन्तर कामना करते रहते हैं। दूसरों की क्या बात है? यहाँ शरीरत्याग करने वाले सभी प्राणी सीधे स्वर्ग में चले जाते हैं।

इसप्रकार यह पुष्कर क्षेत्र एक उत्तम तीर्थ है, श्रेष्ठ वन है तथा यहाँ अनेक देवताओं से सुसेवित बहुत से पुण्यमय तीर्थ विद्यमान हैं। यह स्थान चम्पक, दाडिम, अशोक, पुन्नाग, कर्णिकार, पाटल, नारिकेल, खजूर, तमाल, ताल, साल, वट, पीपल, पाकड़, आदि अनेक प्रकार के सुन्दर वृक्षों से परिपूर्ण, कुन्द, मन्दार, मल्लिका आदि सुगन्धित पुष्पों से भरपूर तथा तुलसी के पौधों से परम पवित्र है। मोहग्रस्त होकर जो प्राणी यहाँ पाप करते हैं, उन नराधमों का इस पुण्यमय भारतवर्ष में पुनः जन्म नहीं होता। यहाँ का किया हुआ थोड़ा-सा पुण्य भी पर्वत के समान महान् बन जाता है तथा यहाँ का लिया हुआ प्रतिग्रह हालाहल विष के सदृश अनिष्टकारी हो जाता है। अन्य जगहों के किये हुए पाप यहाँ नष्ट हो जाते हैं तथा यहाँ का किया हुआ पाप तो मेरु के तुल्य स्थायी हो जाता है। इसलिये हे महर्षियों! यदि आप लोग परम गति चाहते हो, तो दुष्कृत्यों का त्यागकर पुण्य कर्म करो।

इसे सुनकर पुष्करक्षेत्र के निवासी उन पुण्याभिलाषी मुनियों ने भरद्वाजजी से पुनः पूछा—ऋषिप्रवर! पुण्यानुष्ठान तो बड़ा दुष्कर कर्म है। अतः जहाँ पाप ही पुण्य हो जाता हो, ऐसा श्रेष्ठ स्थान आप बताने की कृपा करें। इस प्रश्न को सुनकर भरद्वाजमुनि ने कहा—महर्षियों! मैंने इस बात को तो एकबार कुशकेतु से पूछा था, उन्होंने जो उत्तर दिया था, उसे मैं आपलोगों से बताता हूँ—सभी देशों में ओड्रदेश परम पवित्र है, जहाँ का पाप भी पुण्य हो जाता है, वहाँ अनेक पवित्र तीर्थ हैं, थोड़ा सा पुण्य भी अधिक हो जाता है। अतः मनुष्यों को उस परम पवित्र ओड्रदेश का सेवन करना चाहिए।

दूसरा अध्याय

ऋषियों ने भरद्वाजमुनि से पुनः पूछा—भगवन्! कृपया आप ओड्रदेश की महिमा विस्तार से बतावें, हमलोग वहाँ जायेंगे और निवास करेंगे। इसके उत्तर में उन्होंने कहा—पूर्वकाल में देवताओं ने ओड्रदेश का निर्माण किया है। वहाँ मनुष्यों के सभी पाप विनष्ट हो जाते हैं। विस्तारपूर्वक उस पवित्र देश का वर्णन करता हूँ, सावधान होकर आप लोग सुनें। उस ओड्रदेश में भगवान् श्रीकृष्ण, सूर्य, भगवती पार्वती तथा शिवजी निरन्तर निवास करते हैं। अतः यह उत्तम स्थान सभी पापों का विनाशक है। यहाँ नदियों में उत्तम नदी महानदी विख्यात है, जिसमें स्नान करने से मनुष्य दिव्य लोक में जाकर अनन्त सुख प्राप्त करता है।

त्रेतायुग में नितिज्ञाता तथा सर्वशास्त्रज्ञ पुलह का पुत्र सुकान्तिनामक ब्राह्मण ने महेन्द्र पर्वत पर अपने पिता से पूछा—पिताजी! यह स्थान मनुष्यों से व्याप्त हो गया है। मैं तपस्या करना चाहता हूँ। अतः कृपया कोई एक स्थान बतावें, जहाँ मैं तपस्या करूँ? तब उन्होंने विन्ध्यपर्वत पर पक्षी-मृग-सिद्ध-गन्धर्व-किन्नरों से सुसेवित एक निर्जन स्थान बतलाया। तब वह सुकान्ति तत्काल पुण्यकार्यों के फल देनेवाले उस शुभद तपःस्थान पर जाकर देखा कि वहाँ जल का अभाव है। अतः गङ्गाजी का जप करते हुए उसने प्रार्थना की—भगवति गङ्गे! मैं यहाँ तप करूँगा। अतः कृपाकर आप यहां पधारें। तदनुसार सर्वसिद्धि-प्रदायक उस स्थान पर गङ्गाजी ने तत्काल अवतीर्ण होकर कहा—वत्स! तुम्हारे मन्त्र-जप के प्रभाव से तुम्हारे लिए मैं इस विन्ध्य-पर्वत पर आ गई हूँ। अब तुम स्वेच्छापूर्वक तप करो। मैं तबतक यहाँ रहूँगी जबतक तुम्हारा तप पूर्ण न हो जाय। अनन्तर पूर्वसागर में जा मिलूँगी। मनुष्यों की तो बात ही क्या है? मैं देवताओं को भी दुर्लभ हूँ। पुलह के प्रभाव से मैं यहाँ तुझे प्राप्त हो गई हूँ। गङ्गाजी

का यह बचन सुनकर पुलह-पुत्र वह सुकान्ति स्तुति करते हुए कहने लगा—सरित्श्रेष्ठे गंगे ! आप भूतभावन भगवान् शिव, विष्णु तथा ब्रह्माजी को परम प्रिय हो। आप सर्वप्रथम भगवान् विष्णु के चरणकमल से आविर्भूत होकर ब्रह्माजी के कमण्डलु में आयीं, अनन्तर राजा भगीरथ की तीव्र तपस्या से प्रसन्न होकर ब्रह्मलोक से भगवान् शङ्कर के मस्तक पधारीं, बाद सर्वजनकल्याणार्थ इस भूतल पर आ गई हो। हे सर्वपापघ्नी, त्रैलोक्यपावनी, शरणागतवत्सला, त्रिपथगे गङ्गे ! मुझ शरणागत की रक्षा करें। आप सभी देवताओं की पूज्य हो। अतः मैं बार-बार आपका नमस्कार करता हूँ। इस प्रकार सुकान्ति की स्तुति सुनकर तथा हार्दिकी भक्ति देखकर उन्होंने भूमि से उसे उठा लिया, मुख चूमकर उसकी देह से धूलि पोंछ दिया और अपनी गोद में उसे बैठाकर यह मधुर बचन कहा—महाभाग ! मैं तुझ पर प्रसन्न हूँ, अब तुम मेरे धर्मपुत्र हो और मैं तुम्हारी धर्ममाता हूँ। अतः अब तुम अपना मनोवाञ्छित वर मुझसे शीघ्र माँग लो।

इसके बाद सुकान्ति ने कहा—मातः आपने जो पूर्वसागर में जाने की चर्चा की है, तदनुसार आप जायँ और मेरी कीर्ति का विस्तार हो, परिश्रम से अर्जित मेरा तप पूर्ण हो जाय। तब गङ्गाजी ने कहा—बेटा ! ऐसा ही होगा, तुम्हारा तप विभवार्जित होगा। मैं यहाँ अपने नाम से प्रसिद्ध नहीं रहूँगी, किन्तु महानदी के नाम से विख्यात रहूँगी। यद्यपि राजा भगीरथ ने अपने पूर्वपुरुषों को तारने के निमित्त तपस्या कर मुझे इस भूतल पर लाया है, फिर भी मैं अनेकों का कल्याण करती रहूँगी और तुम्हारी कीर्ति अमर रहेगी।

इस आख्यान को सुनाकर भरद्वाजमुनिने ऋषियों से कहा—इस प्रकार त्रैलोक्यपावनी गङ्गाजी उस सुकान्ति नामक ब्राह्मण को वरदान देकर जलके रूप से पूर्वसमुद्र में जा मिलीं और वही महापुण्या महानदी उत्कल देश में जाकर चित्रोत्पला नाम से प्रख्यात हुईं। जो मनुष्य

श्रद्धा से परम पवित्र महानदी में स्नान कर शिव-पार्वती का दर्शन करता है, वह सभी पापों से मुक्त हो जाता है तथा गङ्गास्नान का महाफल प्राप्त करता है।

तीसरा अध्याय

ऋषियों ने भरद्वाज मुनिने कहा—भगवन्! आपने भगवान् श्रीकृष्ण, सूर्य और शिव-पार्वतीका वृत्तान्त कह सुनाया, कृपया अब उनके क्षेत्र और तीर्थों को यथार्थ रूप से वर्णन कीजिये। यह प्रश्न सुनकर भरद्वाज मुनि ने कहना प्रारम्भ किया—महर्षियों! मैं पहले क्षेत्र तथा तीर्थों का महात्म्य संक्षेप से बताऊँगा, आपलोग सावधान होकर सुनें। दारुब्रह्म का पुण्यप्रद नीलाचल नामक क्षेत्र है, वहाँ शरीर त्यागने के बाद मनुष्य वैकुण्ठ पद प्राप्त करता है। महापुण्यप्रद नीलाचल दश योजन विस्तीर्ण और अर्द्धयोजन ऊँचा है। वहाँ अनेक मुनिगण विराजमान है, वह वन विविध विहंगमों से सुशोभित है, सफल वृक्षों से संयुक्त तथा अनेक-विध पुष्पों से सुगन्धित है। साक्षात् वैकुण्ठ के समान वह पुरुषोत्तम क्षेत्र सभी क्षेत्र एवं तीर्थों में श्रेष्ठ है। पुरुषोत्तम क्षेत्र में निद्रा, समाधि, सत्कर्म आदि धर्मकार्य सफल होते हैं और महोदधि तीर्थ में स्नान कर जगन्नाथ जी का दर्शन करने से ब्रह्महत्यादि दोष दूर हो जाते हैं। पहले जगन्नाथ जी नीलाचल पर्वत पर नीलपत्थर के रूप में थे, इस समय वे दारु के रूप में वर्तमान हैं।

पुनः ऋषियों ने भरद्वाज जी से पूछा—भगवान्! पहले जगत्पति नीलपत्थरके रूप में तथा इस समय दारुके रूपमें क्यों हैं? इसके उत्तर में भरद्वाज जी ने कहा—मुनियों! सत्ययुग में चन्द्रमा के समान स्वच्छ एवं शत्रुनाशक इन्द्रद्युम्ननामक एक राजा थे, जिनकी भगवान् में दृढ़ निष्ठा थी, वे साक्षात् ब्रह्मा जी के पञ्चम शिर थे। जिससमय भगवान् शंकर ने पार्वती जी से विवाह किया था, उस समय एका-एक उन्होंने ब्रह्मा जी के उस पञ्चम शिर को काट डाला। तबसे ब्रह्माजी

चतुर्मुख हो गये और छिन्न शिर राजा इन्द्रद्युम्न के नामसे विख्यात हुए। वे बड़े ही तपस्वी, दान्त, शान्त, अतिथिपूजक, सत्यवादी और वैष्णव थे। जब वे अपने हृदय में भगवान् विष्णु के दर्शन की चिन्ता करने लगे, तब स्वप्न में दर्शन देकर विष्णु ने कहा—राजन्! लवणसमुद्र के तट पर मेरा नीलाचल क्षेत्र है, जहाँ मैं मनुष्यों को मुक्ति देता हूँ। वह स्थान ब्रह्मादि देवों को परम दुर्लभ है। वीतराग योगीजन भी उस मेरे स्थान को नहीं जानते हैं। वह अत्यन्त गोप्य पुरुषोत्तम क्षेत्र प्रलय कालमें भी नष्ट नहीं होता है। सभी स्थानों को त्याग कर मैं पुरुषोत्तम क्षेत्र में वटपत्र के पुट में वर्तमान रहता हूँ। वहाँ तू जाओ सावधानता से तप करते हुए इन्द्रनीलशरीर के रूप में मुझे देखोगे। वहीं रोहिण्याख्य तीर्थ है, वहाँ भक्ति से स्नान कर मनुष्य मुझ में लीन हो जाताहै। इतना कहने के बाद इन्द्रद्युम्न की नींद टूट गई। उठने पर वे उस दिव्य श्यामसुन्दर को न देखकर दुःखी हो कृष्ण! कृष्ण! कहकर रोते हुए कहने लगे—मैंने देवता और ब्राह्मणों का क्या अपकार किया? क्या पानी पीने के लिये आई हुई गायों को मैंने रोक दिया कि भगवान् का दर्शन नहीं हो रहा है? क्या मैंने व्यर्थ ही वृक्षों का छेदन कर दिया है कि भगवान् मुझे अपना दर्शन नहीं दे रहे हैं? क्या मैंने वलिवैश्वदेव के समय अतिथियों का अर्चन नहीं किया कि मेरे देखते देखते भगवान् अन्तर्धान हो गये? क्या मैंने दूसरों की निन्दा की है या वस्त्रों का अपहरण किया है कि भगवान् दर्शन नहीं देते? क्या मैंने ब्राह्मण एवं गौओं की हत्या की है कि भगवान चले गये? क्या मैंने दुःखित प्रजाओं की रक्षा नहीं की कि मेरे देखते देखते भगवान् अन्तर्हित हो गये? क्या मैंने कुएँ में तृण, काष्ट या लोष्ठ फेक दिया है कि मुझे भगवान् का दर्शन नहीं होता? क्या मैंने सभ्यों का आदर नहीं किया या पितरों का तर्पण नहीं किया है जिससे भगवान् दर्शन नहीं देते? इस प्रकार इन्द्रद्युम्न के विलाप करते समय मन्त्री, पुरोहित और पुरवासी आदि वहाँ आ गये तथा

दुःखित होकर पूछने लगे - राजन्! आप क्यों रो रहे हो, कृपया कहिए हम लोग उसे पूरा करेंगे। उनकी प्रार्थना सुनकर राजा ने कहा—सज्जनों! मैंने स्वप्न में शंख-चक्र-गदा-धारी एवं पीतवस्त्र घनश्याम को देखा, उन्होंने मुझे आदेश दिया कि राजन्! इन्द्रलीन पर्वत पर जाकर तपस्या करो, वहीं तुझे मेरा दर्शन होगा। तदनुसार अब मैं नीलाद्रि पर चलूँगा, आप लोग वहाँ चलने की तैयारी करें। यह स्वीकार कर सभी लोग अपने-अपने स्थान पर जाकर नीलाद्रिपर चलने की तैयारी करने लगे।

इसी बीच सूर्य-पुत्र यमराज दुःखी होकर कांपते हुए नीलपर्वत पर जाकर भगवान् वासुदेव के सामने खड़े हो बोले—सर्वलोकहितैषी, स्वप्रकाश, भगवान् विष्णो! अब मैं क्या करूँ, आप सबके दुःखों को दूर करने वाले हैं। यह सुनकर भगवान् विष्णु ने कहा—यमुनासहोदर, तुम्हें कौन सा दुःख उपस्थित है? कहो उसे मैं अवश्य दूर करूँगा। इस प्रकार का आश्वासन सुनकर उन्होंने कहा—देव! राजा इन्द्रद्युम्न अपनी सेना के साथ आ रहे हैं, वे सभी मुक्त हो जायेंगे, तब मैं क्या करूँगा। अतः हे केशव! नीलपर्वत पर वर्तमान जगन्नाथ जी को छोड़कर रोहिणख्य तीर्थ पाताल चला जाय, क्योंकि उसमें स्नान करने से काक भी मुक्त हो जाता है और उनके स्वरूप का दर्शन कर मुर्दा भी अमर हो जाता है। यह सुनकर भगवान् ने कहा—राजन्! तुमने ठीक कहा है, वैसा ही होगा। अनन्तर विश्वकर्मा ने तत्काल तीन प्रतिमाओं का निर्माण किया। बाद जगन्नाथ जी से आज्ञा लेकर यमराज अपनी यमपुरी में चले गये और भगवान विष्णु उस पुण्यप्रद शुभ नीलाचल पर्वत पर ही रह गये।

चौथा अध्याय

हितैषी मन्त्री, पुराणज्ञ पुरोहित, श्रद्धालु प्रजा तथा उत्साही सेना के सहित जगन्नाथ जी के दर्शन के लिए जाते हुए राजा ने मार्ग में बन के

एक भाग में वर्तमान नीलपर्वत के शिखर को देखकर नमस्कार किया। स्वर्णकूट से आगे नीलशैल पर शंख-चक्र-गदाधारी जगन्नाथ जी के समीप जाकर राजा इन्द्रद्युम्न ने हाथ जोड़कर नारद जी से पूछा—देवर्षे! आप त्रिकालज्ञ हैं, मेरा दाहिना नेत्र तथा बाया अङ्ग फरक रहा है, क्या कारण है? कृपया बतलाइए। यह प्रश्न सुनकर नारद जी ने उत्तर दिया कि आज भगवान् तथा रोहिण्याख्य तीर्थ पाताल चले गये हैं। वज्रपात के समान यह बचन सुनकर राजा इन्द्रद्युम्न पर्वत के द्वितीय शृंग के सदृश पृथ्वी पर गिर पड़े। पृथ्वी पर गिरे हुए इस राजा को देखकर मन्त्री, पुरोहित आदि सभी ने दुःखित हो पृथ्वी से उन्हें उठाया। उसी समय नारदजी ने दुःखी हुए राजा से कहा—ब्रह्मा जी ने मुझे आपके पास भेजा है, अभी जगन्नाथ जी पुनः यहाँ आ जायेंगे। इतने में ही मनुष्यों ने शोर मचाया कि शंख-चक्र से अङ्कित एक दारु जल में तैर रहा है। मनुष्यों का वह शोर सुनकर राजा अतिप्रसन्न हो हाथ जोड़कर नारद जी से कहा—वल्लकी नामक वीणा बजाने वाले नारद जी, आपको अनेकशः नमस्कार है। बाद परिजनों के साथ राजा ने जाकर उस दारु को देखा। तत्काल विश्वकर्मा को बुलाकर श्रीकृष्ण, बलभद्र और सुभद्रा की तीन प्रतिमाएँ तथा चतुर्थ सुदर्शनस्तम्भ बनवाया। इन तीन प्रतिमाओं को मण्डप में रख कर उनकी प्रतिष्ठा कराने के लिए ब्रह्मलोक में ब्रह्मा जी के पास जाकर दोनों हाथ जोड़कर उनसे प्रार्थना किया कि भगवन्! आप प्रतिष्ठा करा कर मेरा मनोरथ पूर्ण करें। तदनुसार ब्रह्मा जी ने कहा—वत्स! तुम्हारे समान वैष्णव इस भूतल पर न तो कोई हुआ, न होगा, न है ही। राजन्! शीघ्र चलो इस समय मैं अवश्य चलूँगा और जगन्नाथ जी की प्रतिष्ठा कराऊँगा। ब्रह्माजी की आज्ञा सुन राजा इन्द्रद्युम्न प्रसन्न होकर ब्रह्मलोक से भूतल पर आ गये। ब्रह्माजी ने भी तत्काल आकर प्रतिष्ठा करा दी तथा देवताओं ने 'जितं ते, इस मन्त्र से स्तुति की। शंख-चक्र-गदाधारी भगवान् हरि प्रसन्न होकर राजा से बोले—

राजन् ! मैं अन्य पुण्य क्षेत्रों को त्यागकर परार्द्ध तक यहीं रहूँगा। तुम स्नान कर गुण्डीचाख्य महोत्सव करो। जो मनुष्य महोदधि में स्नान कर मेरा दर्शन करेगा, वह सभी पापों से मुक्त होकर वैकुण्ठ पधारेगा। यह कहकर भगवान् विष्णु मौन हो गये, ब्रह्माजी ब्रह्मलोक चले गये और राजर्षि इन्द्रद्युम्न भगवान् का पूजन कर मुक्त हो गये। इस प्रकार जगन्नाथ जी पहले इन्द्रनीलस्वरूप थे तथा अब दारु के रूप में वर्तमान हैं।

पांचवां अध्याय

जो मनुष्य पुरुषोत्तम क्षेत्र में निवास करते हैं, वे शरीरान्त के बाद विष्णुलोक में जाते हैं। जो मनुष्य महोदधि में स्नान कर श्रीपुरुषोत्तम का दर्शन करता है, वह ब्रह्महत्या आदि पापों से मुक्त होकर मोक्ष प्राप्त करता है। गंगा, गोदावरी तथा सरस्वती की यात्रा से जो फल मिलता है, वही फल अचलाम्बुधि के दर्शन से भी प्राप्त होता है। वहीं त्रैलोक्य-पावन मार्कण्डेय तीर्थ है, जहाँ स्नान कर सभी देवता पहले अपने-अपने पदों को प्राप्त किये। सभी महर्षियों के निमित्त स्वयं भगवान् श्रीकृष्ण ने मार्कण्डेय वट का निर्माण किया था। जो मनुष्य वहाँ स्नान कर भगवान् शङ्कर का दर्शन करता है, उसके कोटिजन्म के पाप नष्ट हो जाते हैं। नीलाचल से दक्षिण यमेश्वर का दर्शन एवं पूजन कर यम-दण्ड रहित होकर मनुष्य शिवलोक में जाता है। उसके पश्चिम भाग में अलावुनाथ का दर्शन कर मनुष्य अपना मनोरथ पूरा करता है। उस लिंग के सेवन से अपुत्र मनुष्य पुत्रवान् तथा कुरूप मदन के समान रूपवान् हो जाता है। उसी के समीप कपालमोचन लिंग है। उसके दर्शन से मनुष्य ब्रह्महत्या पाप से मुक्त हो जाता है। जगन्नाथ-पुरी में सुपच अन्न और अपूप के भक्षण से मनुष्य को मुक्ति मिलती है और वटेश्वर के दर्शनमात्र से सभी पाप दूर हो जाते हैं। वाराणसी

के समान ही पुरुषोत्तम क्षेत्र भी है। त्रिलोक में पुरुषोत्तम क्षेत्र के समान कोई क्षेत्र नहीं है, क्योंकि वह सभी क्षेत्रों का राजा है और सभी देवताओं में पुरुषोत्तम उत्तम देवता हैं। अधिक कहने से क्या लाभ है, मैं सत्य कहता हूँ कि हजार वर्षों में भी पुरुषोत्तम का माहात्म्य नहीं कहा जा सकता है।

पुनः ऋषियों ने कहा—आपने पुरुषोत्तम क्षेत्रको मुक्तिदाता बताया है, कृपया अब बतावें कि वहाँ क्या करना चाहिए। आपने यमेश को भी मुक्तिदायक कहा है। वहां इन्द्र आदि सभी देवता तप करते हैं। वहां का अनुष्ठित थोड़ा सा भी पुण्य मेरुपर्वत के समान महान हो जाता है। अतः वहां मुक्तिके लिए आप लोग तप करें। यह कह कर पुनः भरद्वाजजी ने कहा—वहाँ का स्थान महान् पुण्यदायक है तथा देवताओं को भी दुर्लभ है। अधिक पुण्य से देवता तथा महर्षि लोग वहाँ निवास करते हैं। वह बहुविध पुण्यों से सुगन्धित, अनेक वृक्षों से विराजमान और पुन्नाग, नारिकेल, करवीर, कार्णिकार, चम्पक, मालती आदि से परिपूरित है। अतः मुनीन्द्रों ने तपस्या के लिए वह स्थान उत्तम बतलाया है। जो जो मनुष्य वहाँ शान्त होकर पवित्र मन से तपस्या करते हैं वे-वे यमेश्वर की कृपा से मन्त्रसिद्धि प्राप्त कर लेते हैं

छठा अध्याय

ऋषियों ने भरद्वाजमुनि से भगवान् सूर्य का माहात्म्य पूछा, उसके उत्तर में उन्होंने कहा--मैं पवित्र भास्कर क्षेत्र का रहस्य बतलाता हूँ, जहाँ जाकर शाम्ब कुष्ट रोग से मुक्त हो गये। तब ऋषियों ने पुनः पूछा कि शाम्ब के शरीर में कुष्ट कैसे हुआ? इसका कारण उन्होंने बताया—दुष्टों के निग्रह और शिष्टों के अनुग्रह के लिए द्वापर युग में बसुदेव से देवकी के गर्भ में भगवान् श्रीकृष्ण का जन्म हुआ। उनकी जाम्बवती नामक पत्नी में शाम्ब की उत्पत्ति हुई, जो कामदेव के समान

सुन्दर थे। जैसे भगवान् श्रीकृष्ण थे वैसे ही नील मेघ के समान श्याम भी थे। वे भी पीत वस्त्र पहनते थे और उनकी आँखें बड़ी सुहावनी थीं। एकबार शाम्ब श्रीकृष्ण को न जनाकर जलक्रीडा की इच्छा से स्त्रियों के सहित यमुनाजल में उतर गये। उनके अपूर्व सौन्दर्य को देखकर सभी स्त्रियाँ मुग्ध होकर काम से विह्वल हो गईं, परिणामस्वरूप उनका रजःस्राव होने लगा। यह जानकर भगवान् श्रीकृष्णने उन स्त्रियों की निन्दा करते हुए कहा कि स्त्रियों के सतीत्व को धिक्कार है, पुत्र को देखकर वे सभी कैसे मुग्ध हो गईं। अनन्तर कुछ क्रोधकर शाम्ब से कहा—अरे पुत्र ! तुम्हें देखकर तुम्हारी माताओं का रेतः-स्खलन हो गया है। अतः तुम्हें सर्वाङ्ग कुष्ट हो जाय। यह कहते ही शाम्बके सर्वाङ्ग में कुष्ट हो गया। तत्काल डरते हुए शाम्ब ने भगवान् श्रीकृष्ण से प्रार्थना करते हुए कहा—तात ! पुत्र के अपराध करने पर पिता क्षमा कर देता है। कृपया बताइए कि अब मैं क्या करूँ, शाप से मुझे कैसे मुक्ति होगी ? यह सुनकर उन्होंने बताया कि मैत्रेय वन में जाकर इन्द्रियों का निग्रहकर तपस्या करो, भास्कर की प्रसन्नता से तुम कुष्ट रोग से मुक्त हो जावोगे। तदनुसार शाम्ब जितेन्द्रिय होकर अकेले ही वहाँ निराहार एवं वायुभक्ष्य होकर दारुण तप करने लगे। भगवान् श्रीकृष्ण के परम प्रिय पुत्र शाम्ब बारह वर्ष तक सूर्य का पूजन, ध्यान और कीर्तन करते-करते एकाएक पृथ्वी पर गिर सो गये। कुछ देर के बाद स्वयं भक्तवत्सल भगवान् भास्कर ने आकर शाप से मुक्ति का कारण बतलाते हुए कहा— महाबाहो ! उठो तूँ यहीं ठहरो, मैं अपना स्वरूप तुम्हें दिखाऊँगा, जिसे देखकर तूँ कुष्ट रोग से मुक्त हो जावोगे। जाम्बतीपुत्र शाम्ब ! यदि तुम इस कुष्ट रोग से मुक्ति चाहते हो तो, मेरे भास्कर, सूर्य आदि नामों को निरन्तर कीर्तन करो। जो मनुष्य सूर्योदय के समय मेरे इन इक्कीस नामों का कीर्तन करता है, उसे शान्ति देता हूँ। यह कह कर सूर्य अन्तर्हित हो गये और शाम्ब की नींद टूट गई। वे स्वप्न में सूर्य के आदेशानुसार सोचने लगे।

